ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, हरिः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## तृतीयं काण्डं

**Note: Please refer to the book,TS Kandam 1 for notes and conventions used in this Compilation.**

**Version 1.1** **November 30, 2020**

## Version Notes:

**This is now the current Version 1.1 dated November 30, 2020.**

1. This replaces the earlier version 1.0 dated May 31, 2020.

2. This version has been updated with the errors found and reported till November 15, 2020.

3. Required convention, style and presentation improvements or standardisations have been done whereever applicable.

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 31st January 2019 |
| 2nd | Version Number | 0.0 dated 31st July 2019 |
| 3rd | Version Number | 1.0 dated 31st May 2020 |

# Table of Contents


**3 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायं तृतीयं काण्डं ..................................... 4**

**3.1 तृतीयकाण्डे प्रथमः प्रश्नः – न्यूनकर्माभिधानं ............................. 4**

**3.1.1 Appendix ........................................................ 27**

**3.2 तृतीयकाण्डे द्वितीयः प्रश्नः – पवमानग्राहादीनां व्याख्यानं .............. 29**

**3.3 तृतीयकाण्डे तृतीयः प्रश्नः – वैकृतविधीनामभिधानं ...................... 53**

**3.3.1 Appendix ........................................................ 72**

**3.4 तृतीयकाण्डे चतुर्थः प्रश्नः – इष्टिहोमाभिधानं ............................ 73**

**3.5 तृतीयकाण्डे पञ्चमः प्रश्नः – इष्टिशेषाभिधानं ........................... 96**

ओं नमः परमात्मने, श्री महागणपतये नमः, श्री गुरुभ्यो नमः

हरिः ओं

# 3 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां तृतीयं काण्डं

## 3.1 तृतीयकाण्डे प्रथमः प्रश्नः – न्यूनकर्माभिधानं

**TS 3.1.1.1**

प्रजापतिरकामयत प्रजाः सृजेयेति स तपोऽतप्यत स सर्पानसृजत
सोऽकामयत प्रजाः सृजेयेति सद्वितीयमतप्यत स वयाᳲस्यसृजत
सोऽकामयत प्रजाः सृजेयेति स तृतीयमतप्यत स एतं दीक्षितवाद–
मपश्यत् तमवदत् ततो वै स प्रजा असृजत यत् तपस्तप्त्वा
दीक्षितवादँवदति प्रजा एव तद्यजमानः – [ ] 1

**TS 3.1.1.2**

सृजते यद्वै दीक्षितोऽमेद्ध्यं पश्यत्यपास्माद्दीक्षाक्रामति नीलमस्य
हरो व्येत्यबद्धं मनो दरिद्रं चक्षुः सूर्यो ज्योतिषाᳲश्रेष्ठो दीक्षे मा
माहासीरित्याह नास्माद्दीक्षाऽप क्रामति नास्य नीलं न हरो व्येति यद्वै
दीक्षितमभिवर्.षतिदिव्या आपोऽशान्ता ओजो बलं दीक्षां – [ ] 2

**TS 3.1.1.3**

तपोऽस्यनिर्घ्नन्त्युन्दतीर् बलं धत्तौजो धत्त बलं धत्त मा मे दीक्षां मा तपोनिर्वधिष्टेत्याहै तदेव सर्वमात्मन् धत्ते नास्यौजो बलं न दीक्षां न तपोनिर्घ्नन्त्यग्निर्वै दीक्षितस्य देवता सोऽस्मादेतर्.हितिर इव यर्.हि याति तमीश्वरꣳ रक्षाꣳसि हन्तो –[ ] **3**

**TS 3.1.1.4**

भद्रादभिश्रेयः प्रेहिबृहस्पतिः पुरएता ते अस्त्वित्याहब्रह्म वै देवानां बृहस्पति–स्तमेवान्वारभते स एनꣳ सं पारयत्येद–मगन्म देवयजनं पृथिव्या इत्याह देवयजनꣳ ह्येष पृथिव्या आगच्छति यो यजते विश्वे देवा यदजुषन्त पूर्व इत्याह विश्वे ह्येतद्देवा जोषयन्ते यद्ब्राह्मणा ( ) ऋख्सामाभ्यां ँयजुषा सन्तरन्त इत्याहर्ख्सामाभ्याꣳ ह्येष यजुषा सन्तरति यो यजते रायस्पोषेण समिषा–मदेमेत्या–हाऽशिषमेवै तामा शास्ते ॥ **4**

*(यजमानो – दीक्षाꣳ – हन्तो – ब्राह्मणा –श्चतुर्विꣳशतिश्च) (A1)*

**TS 3.1.2.1**

ए॒ष ते॑ गाय॒त्रो भा॒ग इति॑ मे॒ सोमा॑य ब्रूतादे॒ष ते॒ त्रैष्टु॑भो॒ जाग॑तो भा॒ग

इति॑ मे॒ सोमा॑य ब्रूताच्छन्दो॒मा॒ना॒ꣳ॒ साम्रा᳚ज्यं ग॒च्छे॑ति मे॒ सोमा॑य

ब्रूता॒द् यो वै सोम॒ꣳ॒ राजा॑न॒ꣳ॒ साम्रा᳚ज्यं ँलो॒कं ग॑मयि॒त्वा क्रीणा॒ति॒

गच्छ॑ति॒ स्वाना॒ꣳ॒ साम्रा᳚ज्य॒ं छन्दा॑ꣳसि॒ खलु॒ वै सोम॑स्य॒ राज्ञ॒ः

साम्रा᳚ज्यो लो॒कः पु॒रस्ता॒थ् सोम॑स्य क्र॒यादे॒वम॒भि म॑न्त्रयेत॒

साम्रा᳚ज्यमे॒वै – [ ] **5**

**TS 3.1.2.2**

नं॑ ँलो॒कं ग॑मयि॒त्वा क्री॑णाति॒ गच्छ॑ति॒ स्वाना॒ꣳ॒ साम्रा᳚ज्य॒ं ँयो वै

ता॑नू॒नप्त्र॑स्य प्रति॒ष्ठां ँवेद॒ प्रत्ये॒व ति॑ष्ठति ब्रह्मवा॒दिनो॑ वदन्ति॒ न

प्रा॒श्ञन्ति॒ न जु॑ह्व॒त्यथ॒ क्व॑ तानू॒नप्त्रं॒ प्रति॑ ति॒ष्ठ॒तीति॑ प्र॒जाप॑तौ॒

म॒नसी॑ति ब्रूया॒त् त्रिरव जि॑घ्रेत् प्र॒जाप॑तौ त्वा॒ म॑नसि जुहो॒मीत्ये॒षा वै

ता॑नू॒नप्त्र॑स्य प्रति॒ष्ठा य ए॒वं ँवेद॒ प्रत्ये॒व ति॑ष्ठति॒ यो – [ ] **6**

**TS 3.1.2.3**

वा अ॑द्ध्व॒र्योः प्र॑ति॒ष्ठां ँवे॒द॒ प्रत्ये॒व ति॑ष्ठति॒ यतो॒ मन्ये॒ता॑नभिक्रम्य

हो॒ष्यामीति॒ तत् ति॒ष्ठन्ना श्रा॑वये॒देषा वा अ॑द्ध्व॒र्योः प्र॑ति॒ष्ठा य ए॒वं

वेँद प्रत्येव तिष्ठति यदभिक्रम्य जुहुयात् प्रतिष्ठाया इयात् तस्माथ्

समानत्र तिष्ठता होतव्यं प्रतिष्ठित्यै यो वा अद्ध्वर्योः स्वं वेँद

स्ववानेव भवति स्रुग्वा अस्य स्वं वाँयव्यमस्य – [ ] 7

**TS 3.1.2.4**

स्वं चमसोऽस्य स्वं यँद्वायव्यं वाँ चमसं वाँऽनन्वारभ्याऽऽश्रावयेथ्

स्वादियात् तस्मादन्वारभ्याऽऽश्राव्य॑ स्वादेव नैति यो वै सोमम–

प्रतिष्ठाप्य स्तोत्र–मुपाकरोत्यप्रतिष्ठितः सोमो भवत्यप्रतिष्ठितः

स्तोमो– ऽप्रतिष्ठिता–न्युक्थान्यप्रतिष्ठितो यजमानोऽप्रतिष्ठितो

ऽध्वर्युर्वायव्यं वैँ सोमस्य प्रतिष्ठा चमसोऽस्य प्रतिष्ठा सोमः स्तोमस्य

स्तोम उक्थानां ग्रहं वाँ ( ) गृहीत्वा चमसं वोँन्नीय स्तोत्रमुपा

कुर्यात् प्रत्येव सोम॑ स्थापयति प्रति स्तोमं प्रत्युक्थानि प्रति

यजमानस्तिष्ठति प्रत्यद्ध्वर्युः ॥ 8

*(एव – तिष्ठति यो – वायव्यमस्य – ग्रहं वैँ –*

*कान्नविꣳशतिश्च) (A2)*

**TS 3.1.3.1**

यज्ञं ँवा एतथ् सं भरन्ति यथ् सोमक्रयण्यै पदं ँयज्ञमुख७ं

हविर्द्धाने यर्.हि हविर्द्धाने प्राची प्रवर्तयेयुस्तर्.हि

तेनाक्षमुपाञ्ज्याद्–यज्ञमुख एव यज्ञमनु सन्तनोति प्राञ्चमग्निं प्र हर

न्त्युत् पत्नीमा नयन्त्यन्वना७ंसि प्र वर्तयन्त्यथ वा अस्यैष धिष्णियो

हीयते सोऽनु ध्यायति स ईश्वरो रुद्रो भूत्वा – [ ] **9**

**TS 3.1.3.2**

प्रजां पशून् यजमानस्य शमयितोर्यर्.हि पशुमाप्रीतमुदञ्चं नयन्ति

तर्.हि तस्य पशुश्रपण७ं हरेत् तेनैवैनं भागिनं करोति यजमानो वा

आहवनीयो यजमानं ँवा एतद्वि कर्.षन्ते यदाहवनीयात् पशुश्रपण७ं

हरन्ति स वैव स्यान्निर्मन्थ्यं ँवा कुर्याद्–यजमानस्य सात्मत्वाय यदि

पशोरवदानं नश्येदाज्यस्य प्रत्याख्यायमव द्येथ् सैव ततः ( )

प्रायश्चित्तिर्ये पशुं ँविमथ्नीरन्. यस्तान् कामयेताऽऽर्तिमार्च्छेयुरिति

कुविदङ्गेति नमोवृक्तिवत्यर्चाऽऽग्नीद्ध्रे जुहुयान्नमोवृक्तिमेवैषां ँवृङ्क्ते

ताजगार्तिमार्च्छन्ति ॥ **10** ***(भूत्वा – ततः – षड्विं७ंशतिश्च) (A3)***

**TS 3.1.4.1**

प्रजापतेर्जायमानाः प्रजा जाताश्च या इमाः ।

तस्मै प्रति प्र वेदयचिकित्वाꣳ अनु मन्यतां ॥

इमं पशुं पशुपते ते अद्य बद्ध्नाम्यग्ने सुकृतस्य मद्ध्ये ।

अनु मन्यस्व सुयजा यजाम जुष्टं देवानामिदमस्तु हव्यं ॥

प्रजानन्तः प्रति गृह्णन्ति पूर्वे प्राणमङ्गेभ्यः पर्याचरन्तं ।

सुवर्गं ँयाहि पथिभि र्देवयानै–रोषधीषु प्रति तिष्ठा शरीरैः ॥

येषामीशे – [ ] **11**

**TS 3.1.4.2**

पशुपतिः पशूनां चतुष्पदामुत च द्विपदां ।

निष्क्रीतोऽयं ँयज्ञियं भागमेतु रायस्पोषा यजमानस्य सन्तु ॥

ये बद्ध्यमानमनु बद्ध्यमाना अभ्यैक्षन्त मनसा चक्षुषा च ।

अग्निस्ताꣳ अग्रे प्र मुमोक्तु देवः प्रजापतिः प्रजया सँविदानः ॥

य आरण्याः पशवो विश्वरूपा विरूपाः सन्तो बहुधैकरूपाः ।

वायुस्ताꣳ अग्रे प्र मुमोक्तु देवः प्रजापतिः प्रजया सँविदानः ॥

प्रमुञ्चमाना – [ ] **12**

**TS 3.1.4.3**

भुवनस्य रेतो गातुं धत्त यजमानाय देवाः ।

उपाकृत<sup></sup>ं शशमानं यदस्थाज्जीवं देवानामप्येतु पाथः ॥

नाना प्राणो यजमानस्य पशुना यज्ञो देवेभिः सह देवयानः ।

जीवं देवानामप्येतु पाथः सत्याः सन्तु यजमानस्य कामाः ॥

यत् पशुर्मायुमकृतोरो वा पद्भिराहते ।

अग्निर्मा तस्मादेनसो विश्वान् मुञ्चत्वꣳहसः ॥

शमितार उपेतन यज्ञं – [ ] 13

**TS 3.1.4.4**

देवेभिरिन्वितं ।

पाशात् पशुं प्र मुञ्चत बन्धाद्यज्ञपतिं परि ॥

अदितिः पाशं प्र मुमोक्त्वेतं नमः पशुभ्यः पशुपतये करोमि ॥

अरातीयन्त–मधरं कृणोमि यं द्विष्मस्तस्मिन् प्रति मुञ्चामि पाशं ॥

त्वामु ते दधिरे हव्यवाहꣳ शृतंकर्तारमुत यज्ञियं च ।

अग्ने सदक्षः सतनुर्. हि भूत्वाऽथ हव्या जातवेदो जुषस्व ॥

जातवेदो वपया गच्छ देवान् त्वꣳ ( ) हि होता प्रथमो बभूथ ।

घृतेन त्वं तनुवो वर्द्धयस्व स्वाहाकृतꣳ हविरदन्तु देवाः ॥

स्वाहा देवेभ्यो देवेभ्यः स्वाहा ॥ 14

*(ईशे – प्रमुञ्चमाना – यज्ञं – त्वꣳ – षोडश च) (A4)*

**TS 3.1.5.1**

प्राजापत्या वै पशवस्तेषाꣳ रुद्रोऽधिपतिर्य–देताभ्या–मुपाकरोति

ताभ्यामेवैनं प्रतिप्रोच्या ऽऽ लभत आत्मनोऽनाव्रस्काय द्वाभ्यामुपाकरोति

द्विपाद्यजमानः प्रतिष्ठित्या उपाकृत्य पञ्च जुहोति पाङ्क्ताः पशवः

पशूनेवाव रुन्धेमृत्यवे वा एष नीयते यत् पशुस्तं ँयदन्वारभेत

प्रमायुको यजमानः स्यान्नाना प्राणो यजमानस्य पशुनेत्याह

व्यावृत्त्यै – [ ] 15

**TS 3.1.5.2**

यत् पशुर्मायुमकृतेति जुहोति शान्त्यै शमितार उपेतनेत्याह

यथायजुरेवैतद्वपायां ँवा आह्रियमाणाया–मग्नेर्मेधोऽप क्रामति त्वामु

ते दधिरे हव्यवाहमिति वपामभि जुहोत्यग्नेरेव मेधमव रुन्धेऽथो

शृतत्वाय पुरस्ताथ्स्वाहाकृतयो वा अन्ये देवा उपरिष्टाथ्

स्वाहाकृतयोऽन्ये स्वाहा देवेभ्यो देवेभ्यः स्वाहेत्यभितो वपां ( )

जुहोति तानेवोभयान् प्रीणाति ॥ 16

*(व्यावृत्त्या - अभितो वपां - पञ्च च) (A5)*

**TS 3.1.6.1**

यो वा अयथादेवतं यँज्ञमुपचरत्या देवताभ्यो वृश्च्यते पापीयान् भवति यो यथादेवतन्न देवताभ्य आ वृश्च्यते वसीयान् भवत्याग्नेय्यर्चा ऽऽग्नीद्ध्रमभि मृशेद् वैष्णव्या हविर्द्धानमाग्नेय्या स्रुचो वायव्यया वायव्यान्यैन्द्रिया सदो यथादेवतमेव यज्ञमुप चरति न देवताभ्य आ वृश्च्यते वसीयान् भवति युनज्मि ते पृथिवीं ज्योतिषा सह युनज्मि वायुमन्तरिक्षेण - [ ] 17

**TS 3.1.6.2**

ते सह युनज्मि वाचꣳ सह सूर्येण ते युनज्मि तिस्रो विपृचः सूर्यस्य ते ।

अग्निर्देवता गायत्री छन्द उपाꣳशोः पात्रमसि सोमो देवता त्रिष्टुप् छन्दोऽन्तर्यामस्य पात्रमसीन्द्रो देवता जगती छन्द इन्द्रवायुवोः पात्रमसि बृहस्पति र्देवताऽनुष्टुप् छन्दो मित्रावरुणयोः पात्रमस्यश्विनौ देवता पङ्क्तिश्छन्दोऽश्विनोः पात्रमसि सूर्यो देवता बृहती - [ ] 18

**TS 3.1.6.3**

छन्दः शुक्रस्य पात्रमसि चन्द्रमा देवता सतोबृहती छन्दो मन्थिनः पात्रमसि विश्वेदेवा देवतोष्णिहा छन्द आग्रयणस्य पात्रमसीन्द्रो देवता ककुच्छन्द उक्थानां पात्रमसि पृथिवी देवता विराट् छन्दो ध्रुवस्य पात्रमसि ॥ **19**

*(अन्तरिक्षेण – बृहती – त्रयस्त्रिꣳशच्च) (A6)*

**TS 3.1.7.1**

इष्टर्गो वा अद्ध्वर्युर्यजमानस्येष्टर्गः खलु वै पूर्वोऽर्ष्टुः क्षीयत आसन्यान्मा मन्त्रात् पाहि कस्याश्चिदभिशस्त्या इति पुरा प्रातरनुवाकाज्जुहुयादात्मन एव तदद्ध्वर्युः पुरस्ताच्छर्म नह्यतेऽनार्त्यै सँवेशाय त्वोपवेशाय त्वा गायत्रिया स्त्रिष्टुभो जगत्या अभिभूत्यै स्वाहा प्राणापानौ मृत्योर्मा पातं प्राणापानौ मा मा हासिष्टं देवतासु वा एते प्राणापानयोर् – [ ] **20**

**TS 3.1.7.2**

व्यायच्छन्ते येषाꣳ सोमः समृच्छते सँवेशाय त्वोपवेशाय त्वेत्याह छन्दाꣳसि वै सँवेश उपवेशश्छन्दोभिरेवास्य छन्दाꣳसि

वृङ्क्ते प्रेतिवन्त्याज्यानि भवन्त्यभिजित्यै मरुत्वतीः प्रतिपदो विजित्या उभे बृहद्रथन्तरे भवत इयं ँवाव रथन्तरमसौ बृहदाभ्यामेवैनमन्तरेत्यद्य वाव रथन्तर७ श्वो बृहदद्याश्वा देवैनमन्तरेति भूतं - [ ] **21**

**TS 3.1.7.3**

ँवाव रथन्तरं भविष्यद्-बृहद् भूताच्चैवैनं भविष्यतश्चान्तरेतिपरिमितं ँवाव रथन्तरमपरिमितं बृहत् परिमिताच्चैवैन-मपरिमिताच्चाऽन्तरेति विश्वामित्रजमदग्नी वसिष्ठेनास्पर्द्धेता७्स एतज्जमदग्नि र्विहव्यम पश्यत् तेन वै स वसिष्ठस्येन्द्रियं ँवीर्यमवृङ्क्त यद्विहव्य७् शस्यत इन्द्रियमेव तद्वीर्यं ँयजमानो भ्रातृव्यस्य वृङ्क्ते ( ) यस्य भूया७्सो यज्ञक्रतव इत्याहुः स देवता वृङ्क्त इति यद्यग्निष्टोमः सोमः परस्ताथ् स्या-दुक्थ्यं कुर्वीत यद्युक्थ्यः स्यादतिरात्रं कुर्वीत यज्ञक्रतुभिरेवास्य देवता वृङ्क्ते वसीयान् भवति ॥ **22**

*(प्राणापानयो - र्भूतं - ँवृङ्क्ते - ऽष्टाविं७्शतिश्च) (A7)*

**TS 3.1.8.1**

निग्राभ्याः स्थ देवश्रुत आयुर्मे तर्पयत प्राणं मे तर्पयतापानं मे तर्पयत

व्यानं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयत मनोमे तर्पयत

वाचं मे तर्पयताऽऽ*त्मानं मे तर्पयताङ्गानि मे तर्पयत प्रजां मे तर्पयत

पशून् मे तर्पयत गृहान् मे तर्पयत गणान् मे तर्पयत सर्वगणं मा

तर्पयत तर्पयत मा – [ ] **23**

**TS 3.1.8.2**

गणा मे मा वि तृषन्नोषधयो वै सोमस्य विशो विशः खलु वै

राज्ञः प्रदातोरीश्वरा ऐन्द्रः सोमोऽवीवृधं ँवो मनसा सुजाता

ऋतप्रजाता भग इद्वः स्याम ।

इन्द्रेण देवीर्वीरुधः सँविदाना अनु मन्यन्ता॒ँ सवनाय

सोममित्याहौषधीभ्य एवैनँ स्वायै विशः स्वायै देवतायै निर्याच्याभि

षुणोति यो वै सोमस्याभिषूयमाणस्य – [ ] **24**

**TS 3.1.8.3**

प्रथमोऽँशुः स्कन्दति स ईश्वर इन्द्रियं ँवीर्यं प्रजां पशून्

यजमानस्य निर्.हन्तोस्तमभि मन्त्रयेताऽऽ माऽस्कान्थ्सह प्रजया सह

रायस्पोषेणेन्द्रियं मे वीर्यं मा निर्वधीरित्याशिषमेवैतामा शास्त इन्द्रियस्य वीर्यस्य प्रजायै पशूनामनिर्घाताय द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमञ्च योनिमनु यश्च ( ) पूर्वः । तृतीयं ँयोनिमनु सञ्चरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥ 25

*(तर्पयत मा - ऽभिषूयमाणस्य - यश्च - दश च) (A8)*

**TS 3.1.9.1**

यो वै देवान् देवयशसेनार्पयति मनुष्यान् मनुष्ययशसेन देवयशस्येव देवेषु भवति मनुष्ययशसी मनुष्येषु यान् प्राचीन-माग्रयणाद् ग्रहान् गृह्णीयात् तानुपाꣳशु गृह्णीयाद्यानूर्द्ध्वाꣳ-स्तानुपब्दिमतो देवानेव तद्देवयशसेनार्पयति मनुष्यान् मनुष्ययशसेन देवयशस्येव देवेषु भवति मनुष्ययशसी मनुष्येष्वग्निः प्रातस्सवने पात्वस्मान्. वैश्वानरो महिना विश्वशम्भूः । स नः पावको द्रविणं दधात्वा-[ ] 26

**TS 3.1.9.2**

-युष्मन्तः सहभक्षाः स्याम ॥

विश्वे देवा मरुत इन्द्रो अस्मानस्मिन् द्वितीये सवने न जह्युः । आयुष्मन्तः प्रियमेषां ँवदन्तो वयं देवानाꣳ सुमतौ स्याम ॥

इदं तृतीय९ँ सवनं कवीनामृतेन ये चमसमैरयन्त ।
ते सौधन्वनाः सुवरानशानाः स्विष्टिं नो अभि वसीयो नयन्तु ॥
आयतनवतीर्वा अन्या आहुतयो हूयन्तेऽनायतना अन्या या
आघारवतीस्ता आयतनवतीर्याः – [ ] **27**

**TS 3.1.9.3**

सौम्यास्ता अनायतना ऐन्द्रवायव–मादायाऽऽ*घारमा घारयेदद्ध्वरो
यज्ञोऽयमस्तु देवा ओषधीभ्यः पशवे नो जनाय विश्वस्मै
भूतायाऽद्ध्वरोऽसि स पिन्वस्व घृतवद्देव सोमेति सौम्या एव
तदाहुतीरायतनवतीः करोत्यायतनवान् भवति य एवं वेदाथो
द्यावापृथिवी एव घृतेन व्युनत्ति ते व्युत्ते उपजीवनीये भवत
उपजीवनीयो भवति – [ ] **28**

**TS 3.1.9.4**

य एवं वेदैष ते रुद्रभागो यं निरयाचथास्तं जुषस्व विदेर्गौपत्य९ँ
रायस्पोष९ँ सुवीर्य९ँ सँवथ्सरीणा९ँ स्वस्तिं ॥
मनुः पुत्रेभ्यो दायं व्यभजथ् स नाभानेदिष्ठं ब्रह्मचर्यं वसन्तं

निरभजथ् स आऽगच्छथ् सोऽब्रवीत् कथा मा निरभागिति न त्वा
निरभाक्षमित्य-ब्रवीदङ्गिरस इमे सत्रमासते ते - [ ] **29**

**TS 3.1.9.5**

सुवर्गं ँलोकं न प्र जानन्ति तेभ्य इदं ब्राह्मणं ब्रूहि ते सुवर्गं
ँलोकं ँयन्तो य एषां पशवस्ता॑स्ते दास्यन्तीति तदेभ्योऽब्रवीत्
ते सुवर्गं ँलोकं ँयन्तो य एषां पशव आसन् तानस्मा अददुस्तं
पशुभिश्चरन्तं ँयज्ञवास्तौ रुद्र आऽगच्छथ् सोऽब्रवीन्मम
वा इमे पशव इत्यदुर्वै - [ ] **30**

**TS 3.1.9.6**

मह्यमिमानित्यब्रवीन्न वै तस्य त ईशत इत्यब्रवीद्-यद्-यज्ञवास्तौ
हीयते मम वै तदिति तस्माद्-यज्ञवास्तु नाभ्यवेत्य॑ सोऽब्रवीद्-
यज्ञे मा ऽऽ भजाथ ते पशून् नाऽभि म॑स्य इति तस्मा एतं मन्थिनः
स॑स्रावमजुहोत् ततो वै तस्य रुद्रः पशून् नाभ्यमन्यत यत्रैत ( )
मेवं ँविद्वान् मन्थिनः स॑ स्रावं जुहोति न तत्र रुद्रः
पशूनभि मन्यते ॥ **31** ***(दधात्वा - यतनवतीर्या - उपजीवनीयो
भवति - तेऽ - दुर्वै -यत्रैत - मेकादश च) (A9)***

**TS 3.1.10.1**

जुष्टो वाचो भूयासं जुष्टो वाचस्पतये देवि वाक् ।

यद्वाचो मधुमत् तस्मिन् मा धाः स्वाहा सरस्वत्यै ॥

ऋचा स्तोम॰ समर्द्धय गायत्रेण रथंतरं ।

बृहद्–गायत्रवर्तनि ॥

यस्ते द्रप्सः स्कन्दति यस्ते अ॰शुर्बाहुच्युतो धिषणयोरुपस्थात् ।

अद्ध्वर्योर्वा परि यस्ते पवित्राथ् स्वाहाकृतमिन्द्राय तं जुहोमि ॥

यो द्रप्सो अ॰शुः पतितः पृथिव्यां परिवापात् – [ ] **32**

**TS 3.1.10.2**

पुरोडाशात् करम्भात् ।

धानासोमान्मन्थिन इन्द्र शुक्राथ् स्वाहाकृतमिन्द्राय तं जुहोमि ॥

यस्ते द्रप्सो मधुमा॰ इन्द्रियावान्थ् स्वाहाकृतः पुनरप्येति देवान् ।

दिवः पृथिव्याः पर्यन्तरिक्षाथ् स्वाहा कृतमिन्द्राय तं जुहोमि ॥

अद्ध्वर्युर्वा ऋत्विजां प्रथमो युज्यते तेन स्तोमो योक्तव्य

इत्याहुर्वागग्रेगा अग्र एत्वृजुगा देवेभ्यो यशो मयि दधती प्राणान्

पशुषु प्रजां मयि– [ ] **33**

**TS 3.1.10.3**

च यजमाने चेत्याह वाचमेव तद्यज्ञमुखे युनक्ति वास्तु वा एतद्यज्ञस्य क्रियते यद्-ग्रहान् गृहीत्वा बहिष्पवमान(ं) सर्पन्ति पराञ्चो हि यन्ति पराचीभिः स्तुवते वैष्णव्यर्चा पुनरेत्योप तिष्ठते यज्ञो वै विष्णु र्यज्ञमेवाकर्विष्णो त्वन्नो अन्तमः शर्म यच्छ सहन्त्य । प्र ते धारा मधुश्चुत उथ्सं दुह्रते ( ) अक्षितमित्याह यदेवास्य शयानस्योपशुष्यति तदेवास्यैतेनाऽऽ* प्याययति ॥ **34**

*(परिवापात् - प्रजां मयि - दुह्रते - चतुर्दश च) (A10)*

**TS 3.1.11.1**

अग्निना रयिमश्ञवत् पोषमेव दिवेदिवे ।

यशसं ँवीरवत्तमं ॥

गोमा(ं) अग्नेऽविमा(ं) अश्वी यज्ञो नृवथ्सखा सदमिदप्रमृष्यः ।

इडावा(ं) एषो असुर प्रजावान् दीर्घो रयिः पृथुबुध्नः सभावान् ॥

आ प्यायस्व>[1,] सन्ते>[2] ॥

इह त्वष्टारमग्रियं ँविश्वरूपमुप ह्वये ।

अस्माकमस्तु केवलः ॥

तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व ।

यतो वीरः – [ ] 35

**TS 3.1.11.2**

कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥

शिवस्त्वष्टरिहाऽऽ* गहि विभुः पोष उत त्मना ।

यज्ञेयज्ञे न उदव ॥

पिशङ्गरूपः सुभरो वयोधाः श्रुष्टी वीरो जायते देवकामः ।

प्रजां त्वष्टा वि ष्यतु नाभिमस्मे **अथा** देवानामप्येतु पाथः ॥

प्र णो दे>3 व्या, नो दिवः >4 ॥

पीपिवाꣳसꣳ सरस्वतः स्तनं ँयो विश्वदर्.शतः ।

धुक्षीमहि प्रजामिषं ॥ 36

**TS 3.1.11.3**

ये ते सरस्व ऊर्मयो मधुमन्तो घृतश्चुतः ।

तेषां ते सुम्नमीमहे ॥

यस्य व्रतं पशवो यन्ति सर्वे यस्य व्रतमुपतिष्ठन्त आपः ।

यस्य व्रते पुष्टिपतिर्निविष्टस्त९ं सरस्वन्तमवसे हुवेम ॥

दिव्य९ं सुपर्णं वँयसं बृहन्तमपां गर्भं वृँषभमोषधीनां ।

अभीपतो वृष्ट्या तर्पयन्तं त९ं सरस्वन्तमवसे हुवेम ॥

सिनीवालि पृथुष्टुके या देवानामसि स्वसा ।

जुषस्व हव्य – [ ] **37**

**TS 3.1.11.4**

माहुतं प्रजां देवि दिदिड्ढि नः ॥

या सुपाणिः स्वङ्गुरिः सुषूमा बहुसूवरी ।

तस्यै विश्पत्नियै हविः सिनीवाल्यै जुहोतन ॥

इन्द्रं वँो विश्वतस्परी>5, न्द्रं नरः>6 ॥

असितवर्णा हरयः सुपर्णा मिहो वसाना दिवमुत् पतन्ति ॥

त आ ऽववृत्रन्थ् सदनानि कृत्वाऽऽदित् पृथिवी घृतैर्व्युद्यते ॥

हिरण्यकेशो रजसो विसारे ऽहिर्धुनिर्वात इव ध्रजीमान् ।

शुचिभ्राजा उषसो – [ ] **38**

**TS 3.1.11.5**

नवेदा यशस्वतीरपस्युवो न सत्याः ॥

आ ते सुपर्णा अमिनन्त एवैः कृष्णो नोनाव वृषभो यदीदं ।

शिवाभिर्न स्मयमानाभिराऽगात् पतन्ति मिहः स्तनयन्त्यभ्रा ॥

वाश्रेव विद्युन्मिमाति वथ्सं न माता सिषक्ति ।

यदेषां ँवृष्टिरसर्जि ॥

पर्वतश्चिन्महि वृद्धो बिभाय दिवश्चिथ् सानु रेजत स्वने वः ।

यत् क्रीडथ मरुत – [ ] **39**

**TS 3.1.11.6**

ऋष्टिमन्त आप इव सद्ध्रियञ्चो धवद्ध्वे ॥

अभि क्रन्द स्तनय गर्भमा धा उदन्वता परि दीया रथेन ।

दृतिँ सु कर्.ष विषितं न्यञ्चँ समा भवन्तूद्वता निपादाः ॥

त्वं त्या चिदच्युताऽग्ने पशुर्न यवसे ।

धामा ह यत् ते अजर वना वृश्चन्ति शिक्वसः ॥

अग्ने भूरीणि तव जातवेदो देव स्वधावोऽमृतस्य धाम ।

याश्च – [ ] **40**

**TS 3.1.11.7**

माया मायिनां ँविश्वमिन्व त्वे पूर्वीः सन्दधुः पृष्टबन्धो ॥

दिवो नो वृष्टिं मरुतो ररीद्ध्वं प्र पिन्वत वृष्णो अश्वस्य धाराः ।

अर्वाङेतेन स्तनयित्नुनेह्यपो निषिञ्चन्नसुरः पिता नः ॥

पिन्वन्त्यपो मरुतः सुदानवः पयो घृतवद्विदथेष्वाभुवः ।

अत्यं न मिहे वि नयन्ति वाजिनमुथ्सं दुहन्ति स्तनयन्तमक्षितं ॥

उदप्रुतो मरुतस्ताँ इयर्त वृष्टिं – [ ] **41**

**TS 3.1.11.8**

ँये विश्वे मरुतो जुनन्ति ।

क्रोशाति गर्दा कन्येव तुन्ना पेरुं तुञ्जाना पत्येव जाया ॥

घृतेन द्यावापृथिवी मधुना समुक्षत पयस्वतीः कृणुताऽऽ*प ओषधीः ।

ऊर्जं च तत्र सुमतिं च पिन्वथ यत्रा नरो मरुतः सिञ्चथा मधु ॥

उदुत्यं >[7], चित्रं >[8] ॥

और्वभृगुवच्छुचि–मप्नवानवदा हुवे ।

अग्निँ समुद्रवाससं ॥

आ सव॑ँ सवि॒तुर्यथा॑ भग॑स्ये ( ) व भु॒जिँ॑ हुवे ।

अ॒ग्निँ स॑मु॒द्रवा॑ससं ॥

हु॒वे वा॑तस्वनं क॒विं प॒र्जन्य॑क्रन्द्य॒ँ॒ सहः॑ ।

अ॒ग्निँ स॑मु॒द्रवा॑ससं ॥ 42

*(वी॒र – इष॑ँ – ह॒व्य – मु॒षसो॑ – मरुत – श्च॒ – वृ॒ष्टिं – भग॑स्य॒ – द्वाद॑श च) (A11)*

==================================

**Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-**

(प्रजापतिरकामयतै – ष ते गायत्रो – यज्ञं वै – प्रजापतेर्जायमानाः – प्राजापत्या – यो वा अयथादेवत – मिष्टर्गो – निग्राभ्याः स्थ – यो वै देवा – ञ्जुष्टो – ऽग्निना रयि – मेकादश )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(प्रजापतिरकामयत – प्रजापतेर्जायमाना – व्यायच्छन्ते – मह्यमिमा – न्माया मायिनान् – द्विचत्वारि॑ꣳशत्)

**First and Last Padam of First Prasnam of Kandam 3:-**

(प्रजापतिरकामयता –ऽग्निꣳ समुद्रवाससं )

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां तृतीयकाण्डे प्रथमः प्रश्नः समाप्तः ॥

## 3.1.1 Appendix

**1. 3.1.11.1 – आ प्यायस्व >[1]**

**आप्यायस्व** समेतु ते विश्वतः सोम वृष्णियं ।
भवा वाजस्य संगथे ॥ (Appearing in TS **4-2-7-4**)

---

**2. 3.1.11.1 – सन्ते >[2]**

**सं ते** पयाꣳसि समु यन्तु वाजाः सं ँवृष्णियान् यभिमातिषाहः ।
आप्यायमानो अमृताय सोम दिवि श्रवाꣳस्युत्तमानि धिष्व ॥

(Appearing in TS **4-2-7-4**)

---

**3 & 4. 3.1.11.2 – प्रणो देव्या>[3], नो दिवः>[4]**

**प्रणो देवी** सरस्वती वाजेभिर्वाजिनीवती । धीनामवित्र्यवतु ॥

**आ नो दिवो** बृहतः पर्वतादा सरस्वती यजता गन्तु यज्ञं ।
हवं देवी जुजुषाणा घृताची शग्मां नो वाचमुशती शृणोतु ।

(Appearing in TS **1.8.22.1**)

5 & 6. **3.1.11.4** – इन्द्रं ँवो विश्वतस्परी> 5 ,न्द्रं नरः> 6

**इन्द्रं ँवो** विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवलः ॥

**इन्द्रं नरो** नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः ।
शूरो नृषाता शवसश्चकान आ गोमति व्रजे भजा त्वन्नः ॥

(Appearing in **TS 1.6.12.1**)

**7 & 8. 3.1.11.8** – उदुत्यं> 7, चित्रं> 8 ।

**उदु त्यं** जातवेदसं देवं ँवहन्ति केतवः । दृशे विश्वाय सूर्यं ॥

**चित्रं देवाना**मुदगादनीकं चक्षु र्मित्रस्य वरुणस्याऽग्नेः ।
आऽ प्रा द्यावापृथिवी अन्तरिक्ष७ं सूर्य आत्मा जगतस्तस्थुषश्च ॥

(Appearing in **TS 1.4.43.1**)

ओं नमः परमात्मने, श्री महागणपतये नमः, श्री गुरुभ्यो नमः

हरिः ओं

## 3.2तृतीयकाण्डे द्वितीयः प्रश्नः – पवमानग्राहादीनां व्याख्यानं

**TS 3.2.1.1**

यो वै पवमानाना–मन्वारोहान् विद्वान् यजतेऽनु पवमानाना रोहति न पवमानेभ्यो–ऽव च्छिद्यते श्येनोऽसि गायत्रछन्दा अनु त्वाऽऽरभे स्वस्ति मा सं पारय सुपर्णोऽसि त्रिष्टुप्छन्दा अनु त्वा ऽऽ रभे स्वस्ति मा सं पारय सघाऽसि जगतीछन्दा अनु त्वा ऽऽ रभे स्वस्ति मा सं पारयेत्याहैते– [ ] **1**

**TS 3.2.1.2**

वै पवमानाना–मन्वारोहास्तान्. य एवं ँविद्वान् यजतेऽनु पवमानाना रोहति न पवमानेभ्यो ऽवच्छिद्यते यो वै पवमानस्य सन्ततिं ँवेद सर्वमायुरेति न पुरा ऽऽयुषः प्र मीयते पशुमान् भवति विन्दते प्रजां पवमानस्य ग्रहा गृह्यन्तेऽथ वा अस्यैतेऽगृहीता द्रोणकलश आधवनीयः पूतभृत् तान् यदगृहीत्वोपाकुर्यात् पवमानं ँवि – [ ] **2**

**TS 3.2.1.3**

च्छिन्द्यात् तं ँविच्छिद्यमान-मद्ध्वर्योः प्राणोऽनु वि च्छिद्ये-

तोपयामगृहीतोऽसि प्रजापतये त्वेति द्रोणकलशमभि मृशेदिन्द्राय

त्वेत्याधवनीयं ँविश्वेभ्यस्त्वा देवेभ्य इति पूतभृतं पवमानमेव तथ्

सं तनोति सर्वमायुरेति न पुरा ऽऽयुषः प्रमीयते पशुमान् भवति

विन्दते प्रजां ॥ 3

*(एते - वि - द्विचत्वारिꣳशच्च) (A1)*

**TS 3.2.2.1**

त्रीणि वाव सवनान्यथ तृतीयꣳ सवनमव लुम्पन्त्यनꣳशु कुर्वन्त

उपाꣳशुꣳहुत्वोपाꣳशुपात्रेऽꣳशुमवास्य तन्तृतीयसवने ऽपिसृज्याभि

षुणुयाद् यदाप्याययति तेनाꣳशुमद् यदभिषुणोति तेनर्जीषि

सर्वाण्येव तथ् सवनान्यꣳशुमन्ति शुक्रवन्ति समावद्वीर्याणि करोति

द्वौ समुद्रौ विततावजूर्यौ पर्यावर्तेते जठरेव पादाः ।

तयोः पश्यन्तो अति यन्त्यन्यमपश्यन्तः - [ ] 4

**TS 3.2.2.2**

सेतुनाऽति यन्त्यन्यं ॥

द्वे द्रधसी सतती वस्त एकः केशी विश्वा भुवनानि विद्वान् ।

तिरोधायैत्यसितं ँवसानः शुक्रमा दत्ते अनुहाय जार्यै ॥

देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एतं

महायज्ञमपश्यन् तमतन्वताग्निहोत्रं ँव्रतमकुर्वत तस्माद् द्विव्रतः

स्याद् द्विर्. ह्यग्निहोत्रं जुह्वति पौर्णमासं ँयज्ञमग्नीषोमीयं – [ ] 5

**TS 3.2.2.3**

पशुमकुर्वत दार्श्यं ँयज्ञमाग्नेयं पशुमकुर्वत वैश्वदेवं प्रातस्सवन –

मकुर्वत वरुणप्रघासान् माद्ध्यन्दिनꣳ सवनꣳ साकमेधान् पितृयज्ञं

त्र्यम्बकाꣳ–स्तृतीयसवनमकुर्वत तमेषामसुरा यज्ञमन्ववाजिगाꣳसन्

तं नाऽन्ववायन् तेऽब्रुवन्नद्ध्वर्तव्या वा इमे देवा अभूवन्निति तदद्ध्व

रस्याऽद्ध्वरत्वं ततो देवा अभवन् पराऽसुरा य एवं ँविद्वान्थ् सोमेन

यजते भवत्यात्मना परा ( ) ऽस्य भ्रातृव्यो भवति ॥ 6

*(अपश्यन्तोऽ – ग्नीषोमीयं – मात्मना परा – त्रीणि च) (A2)*

**TS 3.2.3.1**

परिभूरग्निं परिभूरिन्द्रं परिभूर्विश्वान् देवान् परिभूर्मा७ं सह

ब्रह्मवर्चसेन स नः पवस्व शं गवे शं जनाय शमर्वते श७ं

राजन्नोषधीभ्यो ऽच्छिन्नस्य ते रयिपते सुवीर्यस्य रायस्पोषस्य

ददितारः स्याम ।

तस्य मे रास्व तस्य ते भक्षीय तस्य त इदमुन्मृजे ॥

प्राणाय मे वर्चोदा वर्चसे पवस्वापानाय व्यानाय वाचे – [ ] **7**

**TS 3.2.3.2**

दक्षक्रतुभ्यां चक्षुर्भ्यां मे वर्चोदौ वर्चसे पवेथा७ं श्रोत्राया ऽऽ*त्मने

ऽङ्गेभ्य आयुषे वीर्याय विष्णोरिन्द्रस्य विश्वेषां देवानां जठरमसि

वर्चोदा मे वर्चसे पवस्व कोऽसि को नाम कस्मै त्वा काय त्वा

यं त्वा सोमेनातीतृपं ँयं त्वा सोमेनामीमद७ं सुप्रजाः प्रजया

भूयास७ं सुवीरो वीरैः सुवर्चा वर्चसा सुपोषः पोषै–र्विश्वेभ्यो

मे रूपेभ्यो वर्चोदा– [ ] **8**

**TS 3.2.3.3**

वर्चसे पवस्व तस्य मे रास्व तस्य ते भक्षीय तस्य त इदमुन्मृजे ॥

बुभूषन्नवेक्षेतैष वै पात्रियः प्रजापतिर्यज्ञः प्रजापतिस्तमेव तर्पयति

स एनं तृप्तो भूत्याऽभि पवते ब्रह्मवर्चसकामोऽवेक्षेतैष

वै पात्रियः प्रजापतिर्यज्ञः प्रजापतिस्तमेव तर्पयति स एनं तृप्तो

ब्रह्मवर्चसेनाभि पवत आमयाव्य – [ ] **9**

**TS 3.2.3.4**

वेक्षेतैष वै पात्रियः प्रजापतिर्यज्ञः प्रजापतिस्तमेव तर्पयति स एनं

तृप्त आयुषाऽभि पवतेऽभिचरन्नवेक्षेतैष वै पात्रियः प्रजापतिर्यज्ञः

प्रजापतिस्तमेव तर्पयति स एनं तृप्तः प्राणापानाभ्यां ँवाचो

दक्षक्रतुभ्यां चक्षुर्भ्यां॑ श्रोत्राभ्या–मात्मनोऽङ्गेभ्य

आयुषोऽन्तरेति ताजक् प्र धन्वति ॥ **10**

*(वाचे–रूपेभ्यो वर्चोदा – आमयावी – पञ्चचत्वारिꣳशच्च) (A3)*

**TS 3.2.4.1**

स्फ्यः स्वस्तिर्विघनः स्वस्तिः पर्.शुर्वेदिः परशुर्नः स्वस्तिः ।

यज्ञिया यज्ञकृतः स्थ ते माऽस्मिन्. यज्ञ उप ह्वयद्ध्वमुप मा

द्यावापृथिवी ह्वयेतामुपाऽऽ*स्तावः कलशः सोमो अग्निरुप देवा

उप यज्ञ उप मा होत्रा उपहवे ह्वयन्तां नमोऽग्नये मखघ्नेमखस्य

मा यशोऽर्यादित्याहवनीयमुप तिष्ठते यज्ञो वै मखो – [ ] **11**

**TS 3.2.4.2**

यज्ञं ँवाव स तदहन् तस्मा एव नमस्कृत्य सदः प्रसर्पत्यात्मनोऽनार्त्यै

नमो रुद्राय मखघ्ने नमस्कृत्या मा पाहीत्याग्नीद्ध्रं तस्मा एव

नमस्कृत्य सदः प्र सर्पत्यात्मनोऽनार्त्यै नम इन्द्राय मखघ्न इन्द्रियं

मे वीर्यं मा निर्वधीरिति होत्रीयमाशिषमेवैतामा शास्तइन्द्रियस्य

वीर्यस्यानिर्घाताय या वै – [ ] **12**

**TS 3.2.4.3**

देवताः सदस्यार्तिमार्पयन्ति यस्ता विद्वान् प्रसर्पति न

सदस्यार्तिमार्च्छति नमोऽग्नये मखघ्न इत्याहैता वै देवताः

सदस्यार्तिमाऽर्पयन्ति ता य एवं ँविद्वान् प्रसर्पति न सदस्यार्तिमार्च्छति

दृढे स्थः शिथिरे समीची माऽ७्हसस्पात७् सूर्यो मा देवो

दिव्याद७्हसस्पातु वायुरन्तरिक्षा – [ ] **13**

**TS 3.2.4.4**

दग्निः पृथिव्या यमः पितृभ्यः सरस्वती मनुष्येभ्यो देवी द्वारौ मा मा

सं ताप्तं नमः सदसे नमः सदसस्पतये नमः सखीनां पुरोगाणां

चक्षुषे नमो दिवे नमः पृथिव्या अहे दैधिषव्योदतस्तिष्ठाऽन्यस्य सदने

सीद योऽस्मत् पाकतर उन्निवत उदुद्वतश्च गेषं पातं मा द्यावापृथिवी

अद्याह्नः सदो वै प्रसर्पन्तं – [ ] **14**

**TS 3.2.4.5**

पितरोऽनु प्र सर्पन्ति त एनमीश्वरा हिꣳसितोः सदः प्रसृप्य

दक्षिणार्द्धं परेक्षेताऽगन्त पितरः पितृमानहं यँुष्माभिर्भूयासꣳ

सुप्रजसो मया यूयं भूयास्तेति तेभ्य एव नमस्कृत्य सदः

प्र सर्पत्यात्मनोऽनार्त्यै ॥ **15**

*(मखो – वा – अन्तरिक्षात् – प्रसर्पन्तं – त्रयस्त्रिꣳशच्च) (A4)*

**TS 3.2.5.1**

भक्षेहि मा ऽऽ विश दीर्घायुत्वाय शन्तनुत्वाय रायस्पोषाय

वर्चसे सुप्रजास्त्वायेहि वसो पुरोवसो प्रियो मे हृदोऽस्यश्विनोस्त्वा

बाहुभ्याꣳ सघ्यासं नृचक्षसं त्वा देव सोम सुचक्षा अव ख्येषं

मन्द्रा ऽभिभूतिः केतुर्यज्ञानां ँवाग्जुषाणा सोमस्य तृप्यतु मन्द्रा

स्वर्वाच्यदितिरनाहतशीर्ष्णी वाग्जुषाणा सोमस्य तृप्यत्वेहि

विश्वचर्.षणे – [ ] **16**

**<u>TS 3.2.5.2</u>**

शम्भूर्मयोभूः स्वस्ति मा हरिवर्ण प्र चर क्रत्वे दक्षाय रायस्पोषाय

सुवीरतायै मा मा राजन् वि बीभिषो मा मे हार्दि त्विषा वधीः ।

वृषणे शुष्मायाऽऽयुषे वर्चसे ॥

वसुमद्गणस्य सोम देव ते मतिविदः प्रातस्सवनस्य गायत्रछन्दस

इन्द्रपीतस्य नराश౮्सपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो

भक्षयामि रुद्रवद्गणस्य सोम देव ते मतिविदो माद्ध्यन्दिनस्य

सवनस्य त्रिष्टुप्छन्दस इन्द्रपीतस्य नराश౮्सपीतस्य – [ ] **17**

**<u>TS 3.2.5.3</u>**

पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयाम्यादित्यवद्गणस्य

सोम देव ते मतिविदस्तृतीयस्य सवनस्य जगतीछन्दस इन्द्रपीतस्य

नराश౮्सपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि ॥

आ प्यायस्व समेतु ते विश्वतः सोम वृष्णियं ।

भवा वाजस्य सङ्गथे ॥

हिन्व मे गात्रा हरिवो गणान् मे मा वितीतृषः ।

शिवो मे सप्तर्.षीनुप तिष्ठस्व मा मेऽवाङ्नाभिमति – [ ] 18

**TS 3.2.5.4**

गाः ॥

अपाम सोमममृता अभूमाऽदर्श्म ज्योतिरविदाम देवान् ।

किमस्मान् कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य ॥

यन्म आत्मनो मिन्दा ऽभूदग्निस्तत् पुनरा ऽहार्जातवेदा विचर्.षणिः ॥

पुनरग्निश्चक्षुरदात्–पुनरिन्द्रो बृहस्पतिः ।

पुनर्मे अश्विना युवं चक्षुरा धत्तमक्ष्योः ॥

इष्टयजुषस्ते देव सोम स्तुतस्तोमस्य – [ ] 19

**TS 3.2.5.5**

शस्तोक्थस्य हरिवत इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो

भक्षयामि ॥

आपूर्याः स्थाऽऽमा पूरयत प्रजया च धनेन च ॥

एतत् ते तत ये च त्वामन्वेतत् ते पितामह प्रपितामह ये च त्वामन्वत्र पितरो यथाभागं मन्ददध्वं नमो वः पितरो रसाय नमो वः पितरः शुष्माय नमो वः पितरो जीवाय नमो वः पितरः – [ ] **20**

**<u>TS 3.2.5.6</u>**

स्वधायै नमो वः पितरो मन्यवे नमो वः पितरो घोराय पितरो नमो वो य एतस्मिन् ँल्लोकेस्थ युष्मा७स्तेऽनु येऽस्मिन् ँल्लोके मां तेऽनु य एतस्मिन् ँल्लोके स्थ यूयं तेषां ँवसिष्ठा भूयास्त येऽस्मिन् ँल्लोकेऽहं तेषां ँवसिष्ठो भूयासं प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव । **21**

**<u>TS 3.2.5.7</u>**

यत् कामास्ते जुहुमस्तन्नो अस्तु वय७ स्याम पतयो रयीणां ॥ देवकृतस्यैनसो ऽवयजनमसि मनुष्यकृतस्यैनसो ऽवयजनमसि पितृकृतस्यैनसो ऽवयजनमस्यफ्सु धौतस्य सोम देव ते नृभिः सुतस्येष्टयजुषः स्तुतस्तोमस्य शस्तोक्थस्य यो भक्षोअश्वसनिर्यो गोसनिस्तस्य ते पितृभिर्भक्षंकृतस्योपहूतस्योपहूतो भक्षयामि ॥ **22**

*(विश्वचर्.षणे – त्रिष्टुप्छन्दस इन्द्रपीतस्य नराश॒ꣳसपीतस्या – ऽति –स्तुतस्तोमस्य – जीवाय नमो वः पितरो – बभूव – चतुश्चत्वारिꣳशच्च) (A5)*

**TS 3.2.6.1**

महीनां पयोऽसि विश्वेषां देवानां तनूर् ऋद्ध्यासमद्य पृषतीनां ग्रहं पृषतीनां ग्रहोऽसि विष्णोर्.हृदयमस्येकमिष विष्णुस्त्वाऽनु वि चक्रमे भूतिर्दद्ध्ना घृतेन वर्द्धतां तस्य मेष्टस्य वीतस्य द्रविणमा गम्याज्ज्योतिरसि वैश्वानरं पृश्ञियै दुग्धं ँयावती द्यावापृथिवी महित्वा यावच्च सप्त सिन्धवो वितस्थुः ।

तावन्तमिन्द्र ते – [ ] **23**

**TS 3.2.6.2**

ग्रहꣳ सहोर्जा गृह्णाम्यस्तृतं ॥

यत् कृष्णशकुनः पृषदाज्यमवमृशेच्छूद्रा अस्य प्रमायुकाः स्युर्यच्छ्वा ऽवमृशेच्चतुष्पादोऽस्य पशवः प्रमायुकाः स्युर्यथ् स्कन्देद् यजमानः प्रमायुकः स्यात् पशवो वै पृषदाज्यं पशवो वा एतस्य स्कन्दन्ति यस्य पृषदाज्यꣳ स्कन्दति यत् पृषदाज्यं

पुनर्गृह्णाति पशूनेवास्मै पुनर्गृह्णाति प्राणो वै पृषदाज्यं

प्राणो वा – [ ] 24

**TS 3.2.6.3**

एतस्य स्कन्दति यस्य पृषदाज्य॒ स्कन्दति यत् पृषदाज्यं पुनर्गृह्णाति

प्राणमेवास्मै पुनर्गृह्णाति हिरण्यमवधाय गृह्णात्यमृतं ँवै हिरण्यं प्राणः

पृषदाज्यममृतमेवास्य प्राणे दधाति शतमानं भवति शतायुः पुरुषः

शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्यश्वमव घ्रापयति प्राजापत्यो वा

अश्वः प्राजापत्यः प्राणः स्वादेवास्मै योनेः प्राणं ( ) निर्मिमीते वि

वा एतस्य यज्ञश्छिद्यते यस्य पृषदाज्य॒ स्कन्दति वैष्णव्यर्चा

पुनर्गृह्णाति यज्ञो वै विष्णुर्यज्ञेनैव यज्ञ॒ सं तनोति ॥ 25

*(ते – पृषदाज्यं प्राणो वै – योनेः प्राणं – द्वावि॒ँशतिश्च) (A6)*

**TS 3.2.7.1**

देव सवितरेतत् ते प्राऽऽ*ह तत् प्र च सुव प्र च यज बृहस्पतिर्ब्रह्मा

ऽऽयुष्मत्या ऋचो मा गात तनूपाथ् साम्नः सत्या व आशिषः सन्तु

सत्या आकूतय ऋतं च सत्यं च वदत स्तुत देवस्य सवितुः प्रसवे

स्तुतस्य स्तुतमस्यूर्जं मह्य॑ स्तुतं दुहामा मा स्तुतस्य स्तुतं

गम्याच्छस्त्रस्य शस्त्र - [ ] **26**

**TS 3.2.7.2**

मस्यूर्जं मह्य॑ शस्त्रं दुहामा मा शस्त्रस्य शस्त्रं

गम्यादिन्द्रियावन्तो वनामहे धुक्षीमहि प्रजामिषं ॥

सा मे सत्या ऽऽशीर्देवेषु भूयाद्-ब्रह्मवर्चसं मा ऽऽ गम्यात् ॥

यज्ञो बभूव स आ बभूव स प्र जज्ञे स वावृधे ।

स देवानामधि-पतिर्बभूव सो अस्मा॑ अधिपतीन् करोतु वय॑

स्याम पतयो रयीणां ॥

यज्ञो वा वै - [ ] **27**

**TS 3.2.7.3**

यज्ञपतिं दुहे यज्ञपतिर्वा यज्ञं दुहे स यः स्तुतशस्त्रयोर्दोहम

विद्वान्. यजते तं ँयज्ञो दुहे स इष्ट्वा पापीयान् भवति य एनयोर्दोहं

ँविद्वान् यजते स यज्ञं दुहे स इष्ट्वा वसीयान् भवति स्तुतस्य

स्तुतमस्यूर्जं मह्य॑ स्तुतं दुहामा मा स्तुतस्य स्तुतं

गम्याच्छस्त्रस्य शस्त्रमस्यूर्जं मह्य॑ शस्त्रं दुहा ( ) मा मा

शस्त्रस्य शस्त्रं गम्यादित्याहैष वै स्तुतशस्त्रयोर्दोहस्तं

ँय एवं ँविद्वान्. यजते दुह एव यज्ञमिष्ट्वा वसीयान् भवति ॥ **28**

*(शस्त्रं – ँवै – शस्त्रन्दुहां – द्वाविꣳशतिश्च) (A7)*

**TS 3.2.8.1**

श्येनाय पत्वने स्वाहा वट्थ्स्वयमभिगूर्ताय नमो विष्टम्भाय

धर्मणे स्वाहा वट्थ्स्वयमभिगूर्ताय नमः परिधये जनप्रथनाय स्वाहा

वट्थ्स्वयमभिगूर्ताय नम ऊर्जे होत्राणाꣳ स्वाहा वट्थ्स्वयमभिगूर्ताय

नमः पयसे होत्राणाꣳ स्वाहा वट्थ्स्वयमभिगूर्ताय नमः प्रजापतये

मनवे स्वाहा वट्थ्स्वयमभिगूर्ताय नम ऋतमृतपाः सुवर्वाट्थ्स्वाहा

वट्थ्स्वयमभिगूर्ताय नमस्तृंपन्ताꣳ होत्रा मधोर्घृतस्य यज्ञपतिमृषय

एनसा – [ ] **29**

**TS 3.2.8.2**

ऽऽहुः ।

प्रजा निर्भक्ता अनुतप्यमाना मधव्यौ स्तोकावप तौ रराध ॥

सं नस्ताभ्याꣳ सृजतुविश्वकर्मा घोरा ऋषयो नमो अस्त्वेभ्यः ।

चक्षुष एषां मनसश्च सन्धौ बृहस्पतये महि षद् द्युमन्नमः ॥
नमो विश्वकर्मणे स उ पात्वस्माननन्यान्थ्-सोमपान् मन्यमानः ।
प्राणस्य विद्वान्थ् समरे न धीर एनश्चकृवान् महि बद्ध एषां ॥
तं ँविश्वकर्मन् - [ ] **30**

**TS 3.2.8.3**

प्र मुञ्चा स्वस्तये ये भक्षयन्तो न वसून्यानृहुः ।
यानग्नयोऽन्वतप्यन्त धिष्णिया इयं तेषामवया दुरिष्ट्यै स्विष्टिं नस्तां
कृणोतु विश्वकर्मा ॥
नमः पितृभ्यो अभि ये नो अख्यन् यज्ञकृतो यज्ञकामाः सुदेवा
अकामा वो दक्षिणां न नीनिम मा नस्तस्मादेनसः पापयिष्ट ।
यावन्तो वै सदस्यास्ते सर्वे दक्षिण्यास्तेभ्यो यो दक्षिणां न-[ ] **31**

**TS 3.2.8.4**

नयेदैभ्यो वृश्च्येत यद्-वैश्वकर्मणानि जुहोति सदस्यानेव तत्
प्रीणात्यस्मे देवासो वपुषे चिकित्सत यमाशिरा दम्पती वाममश्नुतः ।
पुमान् पुत्रो जायते विन्दते वस्वथ विश्वे अरपा एधते गृहः ॥
आशीर्दाया दम्पती वाममश्नुतामरिष्टो रायः सचता॑ँ समोकसा ।

य आऽसिचथ् सं दुग्धं कुम्भ्या सहेष्टेन यामन्नमतिं जहातु सः ॥

सर्पिर्ग्रीवी – [ ] **32**

**TS 3.2.8.5**

पीवर्यस्य जाया पीवानः पुत्रा अकृशासो अस्य ।

सहजानिर्यः सुमखस्यमान इन्द्राया ऽऽ शिरꣳ सह कुम्भ्या ऽदात् ॥

आशीर्म ऊर्जमुत सुप्रजास्त्वमिषं दधातु द्रविणꣳ सवर्चसं ।

संजयन् क्षेत्राणि सहसाऽहमिन्द्र कृण्वानो अन्याꣳ अधरान्थ्सपत्नान् ॥

भूतमसि भूते मा धा मुखमसि मुखं भूयासं द्यावापृथिवीभ्यां

त्वा परि गृह्णामि विश्वे त्वा देवा वैश्वानराः – [ ] **33**

**TS 3.2.8.6**

प्र च्यावयन्तु दिवि देवान् दृꣳहान्तरिक्षे वयाꣳसि पृथिव्यां पार्थिवान्

ध्रुवं ध्रुवेण हविषाऽव सोमं नयामसि ।

यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् ।

यथा न इन्द्र इद्विशः केवलीः सर्वाः समनसः करत् ।

यथा नः सर्वा इद्दिशोऽस्माकं केवलीरसन्न् ॥ **34**

*(एनसा - विश्वकर्मन् - यो दक्षिणां न - सर्पिर्ग्रीवी - वैश्वनरा - श्चत्वारिꣳशच्च) (A8)*

**TS 3.2.9.1**

यद्वै होताऽद्ध्वर्युमभ्याह्वयते वज्रमेनमभि प्र वर्तयत्युक्थशा इत्याह प्रातस्सवनं प्रतिगीर्य त्रीण्येतान्यक्षराणि त्रिपदा गायत्री गायत्रं प्रातस्सवनं गायत्रियैव प्रातस्सवने वज्रमन्तर्द्धत्त उक्थं ँवाचीत्याह माद्ध्यन्दिनꣳ सवनं प्रतिगीर्य चत्वार्येतान्यक्षराणि चतुष्पदा त्रिष्टुप् त्रैष्टुभं माद्ध्यन्दिनꣳ सवनं त्रिष्टुभैव माद्ध्यन्दिने सवने वज्रमन्त र्धत्त-[ ] **35**

**TS 3.2.9.2**

उक्थं ँवाचीन्द्रायेत्याह तृतीयसवनं प्रतिगीर्य सप्तैतान्यक्षराणि सप्तपदा शक्वरी शाक्वरो वज्रो वज्रेणैव तृतीयसवने वज्रमन्त र्धत्ते ब्रह्मवादिनो वदन्ति स त्वा अद्ध्वर्युः स्याद्यो यथासवनं प्रतिगरे छन्दाꣳसि सम्पादयेत् तेजः प्रातः सवन आत्मन् दधीतेन्द्रियं माद्ध्यन्दिने सवने पशूꣳ स्तृतीयसवन इत्युक्थशा इत्याह प्रातस्सवनं प्रतिगीर्य त्रीण्येतान्यक्षराणि - [ ] **36**

**TS 3.2.9.3**

त्रिपदा गायत्री गायत्रं प्रातस्सवनं प्रातस्सवन एव प्रतिगरे
छन्दाꣳसि सं पादयत्यथो तेजो वै गायत्री तेजः प्रातः सवनं तेज
एव प्रातस्सवन आत्मन् धत्त उक्थं ँवाचीत्याह माद्ध्यन्दिनꣳ
सवनं प्रतिगीर्य चत्वार्येतान्यक्षराणि चतुष्पदा त्रिष्टुप् त्रैष्टुभं
माद्ध्यन्दिनꣳ सवनं माद्ध्यन्दिन एव सवने प्रतिगरे छन्दाꣳसि
सं पादयत्यथो इन्द्रियं ँवै त्रिष्टुगिन्द्रियं माद्ध्यन्दिनꣳ सवन–[ ] **37**

**TS 3.2.9.4**

–मिन्द्रियमेव माद्ध्यन्दिने सवन आत्मन् धत्त उक्थं ँवाचीन्द्रायेत्याह
तृतीयसवनं प्रतिगीर्य सप्तैतान्यक्षराणि सप्तपदा शक्वरी शाक्वराः
पशवो जागतं तृतीयसवनं तृतीयसवन एव प्रतिगरे छन्दाꣳसि
सं पादयत्यथो पशवो वै जगती पशवस्तृतीयसवनं पशूनेव
तृतीयसवन आत्मन् धत्ते यद्वै होताऽद्ध्वर्युमभ्याह्वयत
आव्यमस्मिन् दधाति तद्यन्ना – [ ] **38**

**TS 3.2.9.5**

पहनीत पुराऽस्य सँवथ्सराद् गृह आ वेवीरञ्छो॒सा मोद इवेति

प्रत्याह्वयते तेनैव तदप हते यथा वा आयतां प्रतीक्षत एवमद्ध्वर्युः

प्रतिगरं प्रतीक्षते यदभि प्रतिगृणीयाद्यथा ऽऽयतया समृच्छते तादृगेव

तद्यदर्द्धर्चाल्लुप्येत यथा धावद्भ्यो हीयते तादृगेव तत् प्रबाहुग्वा

ऋत्विजामुद्गीथा उद्गीथ एवोद्गातृणा - [ ] **39**

**TS 3.2.9.6**

-मृचः प्रणव उक्थश॒सिनां प्रतिगरोऽद्ध्वर्यूणां ँय एवं ँविद्वान्

प्रतिगृणात्यन्नाद एव भवत्याऽस्य प्रजायां ँवाजी जायत इयं ँवै

होताऽसावद्ध्वर्युर्यदासीनः श॒सत्यस्या एव तद्धोता नैत्यास्त इव

हीयमथो इमामेव तेन यजमानो दुहे यत् तिष्ठन् प्रतिगृणात्यमुष्या

एव तदद्ध्वर्युर्नैति - [ ] **40**

**TS 3.2.9.7**

तिष्ठतीव ह्यसावथो अमूमेव तेन यजमानो दुहे यदासीनः श॒सति

तस्मादितःप्रदानं देवा उप जीवन्ति यत् तिष्ठन् प्रतिगृणाति

तस्मादमुतःप्रदानं मनुष्या उप जीवन्ति यत् प्राङासीनः श॒सति

प्रत्यङ् तिष्ठन् प्रतिगृणाति तस्मात् प्राचीनꣳ रेतो धीयते प्रतीचीः

प्रजा जायन्ते यद्वै होताऽद्ध्वर्युमभ्याह्वयते वज्रमेनमभि प्र वर्तयति

( ) पराङा वर्तते वज्रमेव तन्नि करोति ॥ **41**

***(सवने वज्रमन्तर्धत्ते – त्रीण्येतान्यक्षराणी – न्द्रियं माध्यन्दिनꣳ सवनं – नो – द्वातृणा – मध्वर्युर्नैति – वर्तयत्य – ष्टौ च) (A9)***

**TS 3.2.10.1**

उपयामगृहीतोऽसि वाक्षसदसि वाक्पाभ्यां त्वा क्रतुपाभ्यामस्य

यज्ञस्य ध्रुवस्याऽद्ध्य–क्षाभ्यां गृह्णाम्युपयामगृहीतोऽस्यृतसदसि

चक्षुष्पाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याऽद्ध्यक्षाभ्यां

गृह्णाम्युपयामगृहीतोऽसि श्रुतसदसि श्रोत्रपाभ्यां त्वा क्रतुपाभ्यामस्य

यज्ञस्य ध्रुवस्याऽद्ध्यक्षाभ्यां गृह्णामि देवेभ्यस्त्वा विश्वदेवेभ्यस्त्वा

विश्वेभ्यस्त्वा देवेभ्यो विष्णवुरुक्रमैष ते सोमस्तꣳ

रक्षस्व – [ ] **42**

**TS 3.2.10.2**

तं ते दुश्चक्षा माऽव ख्यन्मयि वसुः पुरोवसुर्वाक्पा वाचं मे पाहि

मयि वसुर्विदद्वसुश्चक्षुष्पाश्चक्षुर् मे पाहि मयि वसुः सँयद्वसुः

श्रोत्रपाः श्रोत्रं मे पाहि भूरसि श्रेष्ठो रश्मीनां प्राणपाः प्राणं

मे पाहि धूरसि श्रेष्ठो रश्मीनामपानपा अपानं मे पाहि यो न इन्द्रवायू

मित्रावरुणा–वश्विनावभिदासति भ्रातृव्य ( ) उत्पिपीते शुभस्पती

इदमहं तमधरं पादयामि यथेन्द्राऽहमुत्तमश्चेतयानि ॥ **43**

***(रक्षस्व – भ्रातृव्य – स्त्रयोदश च) (A10)***

**TS 3.2.11.1**

प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः ।

यस्य त्व॒ँ सख्यमाविथ ॥

प्र होत्रे पूर्व्यं ँवचोऽग्नये **भरता** बृहत् ।

विपां ज्योती॒ँषि बिभ्रते न वेधसे ॥

अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जिह्वा ऋतजात पूर्वीः ।

तिस्र उ ते तनुवो देववातास्ताभिर्नः पाहि गिरो अप्रयुच्छन् ॥

सं ँवाम् कर्मणा समिषा – [ ] **44**

**TS 3.2.11.2**

हिनोमीन्द्राविष्णू अपसस्पारे अस्य ।

जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयन्ता ॥

उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः ।

इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथां ॥

त्रीण्यायूꣳषि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने ।

ताभिर्देवानामवो यक्षि विद्वा**नथा** – [ ] **45**

**TS 3.2.11.3**

–भव यजमानाय शं योः ॥

अग्निस्त्रीणि त्रिधातून्या क्षेति विदथा कविः ।

स त्रीꣳरेकादशाꣳ इह ॥

यक्षच्च पिप्रयच्च नो विप्रो दूतः परिष्कृतः ।

नभन्तामन्यके समे ॥

इन्द्राविष्णू दृꣳहिताः शम्बरस्य नव पुरो नवतिं च श्नथिष्टं ।

शतं वर्चिनः सहस्रं च साकꣳ हथो अप्रत्यसुरस्य वीरान् ॥

उत माता महिष मन्ववेनदमी त्वा ( ) जहति पुत्र देवाः ।
अथाब्रवीद्-वृत्रमिन्द्रो हनिष्यन्थ्-सखे विष्णो वितरं ँवि क्रमस्व ॥ **46**

*(इषा - ऽथ - त्वा - त्रयोदश च) (A11)*

==========================

**Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-**

(यो वै पवमानानां – त्रीणि – परिभूरः – स्फ्यः स्वस्ति – र्भक्षेहि – महीनां पयोऽसि – देव सवितरेतत्ते – श्येनाय – यद्वै होतो – पयामगृहीतोऽसि वाक्षसत् – प्र सो अग्न – एकादश )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(यो वै – स्फ्यः स्वस्तिः – स्वधायै नमः – प्रमुञ्च – तिष्ठतीव – षट्चत्वारि॑ꣳशत् )

**First and Last Padam of Second Prasnam of Kandam 3:-**

(यो वै पवमानानां – विक्रमस्व)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां

तृतीयकाण्डे द्वितीयः प्रश्नः समाप्तः ॥

============================

ओं नमः परमात्मने, श्री महागणपतये नमः, श्री गुरुभ्यो नमः

हरिः ओं

## 3.3तृतीयकाण्डे तृतीयः प्रश्नः – वैकृतविधीनामभिधानं

**TS 3.3.1.1**

अग्ने तेजस्विन् तेजस्वी त्वं देवेषु भूयास्तेजस्वन्तं मा–मायुष्मन्तं
ँवर्चस्वन्तं मनुष्येषु कुरु दीक्षायै च त्वा तपसश्च तेजसे जुहोमि
तेजोविदसि तेजो मा मा हासीन्माऽहं तेजो हासिषं मा मां तेजो
हासीदिन्द्रौजस्विन्नोजस्वी त्वं देवेषु भूया ओजस्वन्तं मामायुष्मन्तं
ँवर्चस्वन्तं मनुष्येषु कुरु ब्रह्मणश्च त्वा क्षत्रस्य चौ – [ ] **1**

**TS 3.3.1.2**

– जसे जुहोम्योजोविदस्योजो मा मा हासीन्माऽहमोजो हासिषं मा
मामोजो हासीथ् सूर्य भ्राजस्विन् भ्राजस्वी त्वं देवेषु भूया
भ्राजस्वन्तं मामायुष्मन्तं ँवर्चस्वन्तं मनुष्येषु कुरु वायोश्च त्वाऽपाञ्च
भ्राजसे जुहोमिसुवर्विदसि सुवर्मा मा हासीन्माऽह ँ सुवर्. हासिषं
मा मा ँ सुवर्.हासीन् मयि ( ) मेधां मयि प्रजां मय्यग्निस्तेजो

दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥ 2

*(क्षत्रस्य च – मयि – त्रयोविꣳशतिश्च) (A1)*

**TS 3.3.2.1**

वायुर्. हिं कर्ता ऽग्निः प्रस्तोता प्रजापतिः साम बृहस्पतिरुद्गाता विश्वे देवा उपगातारो मरुतः प्रतिहर्तार इन्द्रो निधनन्ते देवाः प्राणभृतः प्राणं मयि दधत्वेतद्वै सर्वमद्ध्वर्यु-रुपाकुर्वन्नुद्गातृभ्य उपाकरोति ते देवाः प्राणभृतः प्राणं मयि दधत्वित्याहैतदेव सर्वमात्मन् धत्त इडा देवहू र्मनु-र्यज्ञनी-र्बृहस्पतिरुक्थामदानि शꣳसिषद् विश्वे देवाः – [ ] 3

**TS 3.3.2.2**

सूक्तवाचः पृथिवि मातर्मा मा हिꣳसी र्मधु मनिष्ये मधु जनिष्ये मधुवक्ष्यामि मधुवदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनु मदन्तु ॥ 4

*(शꣳसिषद् विश्वे देवा – अष्टाविꣳशतिश्च) (A2)*

**TS 3.3.3.1**

वसवस्त्वा प्र वृहन्तु गायत्रेण छन्दसाऽग्नेः प्रियं पाथ उपेहि

रुद्रास्त्वा प्र वृहन्तु त्रैष्टुभेन छन्दसेन्द्रस्य प्रियं पाथ उपेह्यादित्यास्त्वा

प्र वृहन्तु जागतेन छन्दसा विश्वेषां देवानां प्रियं पाथ उपेहि मान्दासु

ते शुक्र शुक्रमा धूनोमि भन्दनासु कोतनासु नूतनासु रेशीषु मेषीषु

वाशीषु विश्वभृथ्सु माद्ध्वीषु ककुहासु शक्वरीषु – [ ] **5**

**TS 3.3.3.2**

शुक्रासु ते शुक्र शुक्रमा धूनोमि शुक्रं ते शुक्रेण गृह्णाम्यह्नो रूपेण

सूर्यस्य रश्मिभिः ॥

आऽस्मिन्नुग्रा अचुच्यवुर्दिवो धारा असश्चत ॥

ककुहꣳ रूपं वृषभस्य रोचते बृहथ् सोमः सोमस्य पुरोगाः शुक्रः

शुक्रस्य पुरोगाः ॥

यत् ते सोमाऽदाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहोशिक्

त्वं देव सोम गायत्रेण छन्दसाऽग्नेः – [ ] **6**

**TS 3.3.3.3**

प्रियं पाथो अपीहि वशी त्वं देव सोम त्रैष्टुभेन छन्दसेन्द्रस्य प्रियं

पाथो अपीह्यस्मथ्सखा त्वं देव सोम जागतेन छन्दसा विश्वेषां देवानां

प्रियं पाथो अपीह्या नः प्राण एतु परावत आ ऽन्तरिक्षाद्दिवस्परि ।

आयुः पृथिव्या अध्यमृतमसि प्राणाय त्वा ॥

इन्द्राग्नी मे वर्चः कृणुतां ँवर्चः सोमो बृहस्पतिः ( ) ।

वर्चो मे विश्वेदेवा वर्चो मे धत्तमश्विना ॥

दधन्वे वा यदीमनु वोचद् ब्रह्माणि वेरु तत् ।

परि विश्वानि काव्या नेमिश्चक्र-मिवाऽभवत् ॥ 7

*(शक्वरीष्व - ग्ने - बृहस्पतिः - पञ्चवि॒ꣳशतिश्च) (A3)*

**TS 3.3.4.1**

एतद्वा अपां नामधेयं गुह्यं ँयदाधावा मान्दासु ते शुक्र शुक्रमा

धूनोमीत्याहापामेव नामधेयेन गुह्येन दिवो वृष्टिमव रुन्धे शुक्रं ते

शुक्रेण गृह्णामीत्याहैतद्वा अह्नो रूपं ँयद्-रात्रिः सूर्यस्य रश्मयो

वृष्ट्या ईशतेऽह्न एव रूपेण सूर्यस्य रश्मिभिर्दिवो वृष्टिं

च्यावयत्याऽस्मिन्नुग्रा – [ ] **8**

**TS 3.3.4.2**

अचुच्यवुरित्याह यथायजुरेवैतत् ककुह~ं रूपं ँवृषभस्य रोचते

बृहदित्याहैतद्वा अस्य ककुह~ं रूपं ँयद्–वृष्टी रूपेणैव वृष्टिमव

रुन्धे यत्ते सोमाऽदाभ्यं नाम जागृवीत्याहैष ह वै हविषा हविर्यजति

यो ऽदाभ्यं गृहीत्वा सोमाय जुहोतिपरा वा एतस्याऽऽयुः

प्राण एति – [ ] **9**

**TS 3.3.4.3**

यो ऽ~ंशुं गृह्णात्या नः प्राण एतु परावत इत्याहाऽऽयुरेव प्राणमात्मन्

धत्ते ऽमृतमसि प्राणाय त्वेति हिरण्यमभि व्यनित्यमृतं ँवै हिरण्यमायुः

प्राणोऽमृतेनैवाऽऽ*युरात्मन् धत्ते शतमानं भवति शतायुः पुरुषः

शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्यप उप स्पृशति भेषजं ँवा

आपो ( ) भेषजमेव कुरुते ॥ **10**

*(उग्रा – एत्या – प – स्त्रीणि च) (A4)*

**TS 3.3.5.1**

वायुरसि प्राणो नाम सवितुराधिपत्ये ऽपानं मे दाश्चक्षुरसि श्रोत्रं नाम धातुराधिपत्य आयुर्मे दा रूपमसि वर्णो नाम बृहस्पतेराधिपत्ये प्रजां मे दा ऋतमसि सत्यं नामेन्द्रस्याऽऽ*धिपत्ये क्षत्रं मे दा भूतमसि भव्यं नाम पितृणामाधिपत्ये ऽपा-मोषधीनां गर्भं धा ऋतस्य त्वा व्योमन ऋतस्य - [ ] 11

**TS 3.3.5.2**

त्वा विभूमन ऋतस्य त्वा विधर्मण ऋतस्य त्वा सत्यायर्तस्य त्वा ज्योतिषे प्रजापति र्विराजमपश्यत् तया भूतं च भव्यं चाऽसृजत तामृषिभ्यस्तिरो ऽदधात् तां जमदग्निस्तपसा ऽपश्यत् तया वै स पृश्ञीन् कामानसृजत तत् पृश्ञीनां पृश्ञित्वं ँयत् पृश्ञयो गृह्यन्ते पृश्ञीनेव तैः कामान्. यजमानोऽव रुन्धे वायुरसि प्राणो - [ ] 12

**TS 3.3.5.3**

नामेत्याह प्राणापानावेवाव रुन्धे चक्षुरसि श्रोत्रं नामेत्याहाऽऽयुरेवाव रुन्धे रूपमसि वर्णो नामेत्याह प्रजामेवाव रुन्धऋतमसि सत्यं

नामेत्याह क्षत्रमेवाव रुन्धे भूतमसि भव्यं नामेत्याह पशवो वा

अपामोषधीनां गर्भः पशूनेवा – [ ] **13**

**TS 3.3.5.4**

–व रुन्ध एतावद्वै पुरुषं परितस्तदेवाव रुन्ध ऋतस्य त्वा व्योमन

इत्याहेयं ँवा ऋतस्य व्योमेमामेवाभि जयत्यृतस्य त्वा विभूमन

इत्याहाऽन्तरिक्षं ँवा ऋतस्य विभूमान्तरिक्षमेवाभि जयत्यृतस्य त्वा

विधर्मण इत्याह द्यौर्वा ऋतस्य विधर्म दिवमेवाभि

जयत्यृतस्य– [ ] **14**

**TS 3.3.5.5**

त्वा सत्यायेत्याह दिशो वा ऋतस्य सत्यं दिश एवाभि जयत्यृतस्य

त्वा ज्योतिष इत्याह सुवर्गो वै लोक ऋतस्य ज्योतिः सुवर्गमेव

लोकमभि जयत्येतावन्तो वै देवलोकास्तानेवाभि जयति दश सं

पद्यन्ते दशाक्षरा विराडन्नं ँविराड् विराज्येवान्नाद्ये प्रति तिष्ठति ॥ **15**

*(व्योमन ऋतस्य – प्राणः – पशुनेव – विधर्म दिवमेवाभि*

*जयत्यृतस्य –षट्चत्वारिꣳशच्च) (A5)*

**TS 3.3.6.1**

देवा वै यद्–यज्ञेन नावारुन्धत तत् परैरवारुन्धत तत् पराणां

परत्वं ँयत् परे गृह्यन्ते यदेव यज्ञेननावरुन्धे तस्यावरुद्ध्यै

यं प्रथमं गृह्णातीममेव तेन लोकमभि जयतियं द्वितीयमन्तरिक्षं

तेन यं तृतीयममुमेव तेन लोकमभि जयति यदेते गृह्यन्त एषां

ँलोकानामभिजित्या – [ ] **16**

**TS 3.3.6.2**

उत्तरेष्वहस्स्वमुतो ऽर्वाञ्चो गृह्यन्ते ऽभिजित्यैवेमां ँलोकान् पुनरिमं

ँलोकं प्रत्यवरोहन्ति यत् पूर्वेष्वहस्स्वितः पराञ्चो गृह्यन्ते तस्मादितः

पराञ्च इमे लोका यदुत्तरेष्वहस्स्वमुतो ऽर्वाञ्चो गृह्यन्ते तस्मादमुतो

ऽर्वाञ्च इमे लोकास्तस्मादयातयाम्नो लोकान् मनुष्या

उप जीवन्ति ब्रह्मवादिनो वदन्ति कस्माथ् सत्याददभ्य ओषधयः

सं भवन्त्योषधयो – [ ] **17**

**TS 3.3.6.3**

मनुष्याणामन्नं प्रजापतिं प्रजा अनु प्र जायन्त इति परानन्विति

ब्रूयाद्–यद्–गृह्णात्यद्भ्यस्त्वौषधीभ्यो गृह्णामीति तस्माददभ्य

ओषधयः सं भवन्ति यद्-गृह्णात्योषधीभ्यस्त्वा प्रजाभ्यो गृह्णामीति
तस्मादोषधयो मनुष्याणामन्नं ँयद्-गृह्णाति प्रजाभ्यस्त्वा
प्रजापतये गृह्णामीति तस्मात् प्रजापतिं प्रजा अनु प्र जायन्ते ॥ **18**

*(अभिजित्यै - भवन्त्योषधयो - ऽष्टाचत्वारिꣳशच्च) (A6)*

**TS 3.3.7.1**

प्रजापतिर्देवासुरान सृजत तदनु यज्ञोऽसृज्यत यज्ञं छन्दाꣳसि
ते विष्वञ्चो व्यक्रामन्थ् सोऽसुराननु यज्ञोऽपाक्रामद्-यज्ञं छन्दाꣳसि
ते देवा अमन्यन्ताऽमी वा इदमभूवन्. यद्-वयꣳ स्म इति ते
प्रजापतिमुपाऽधावन्थ् सोऽब्रवीत्-प्रजापतिश्छन्दसां ँवीर्यमादाय
तद्वः प्र दास्यामीति स छन्दसां ँवीर्य - [ ] **19**

**TS 3.3.7.2**

मादाय तदेभ्यः प्रायच्छत् तदनु छन्दाꣳस्यपाऽक्रामन् छन्दाꣳसि
यज्ञस्ततो देवा अभवन् पराऽसुरा य एवं छन्दसां ँवीर्यं ँवेदाऽऽ
श्रावयाऽस्तु श्रौषड् यज ये यजामहे वषट्कारो भवत्यात्मना पराऽस्य
भ्रातृव्यो भवति ब्रह्मवादिनो वदन्ति कस्मै क-मद्ध्वर्युरा श्रावयतीति
छन्दसां ँवीर्यायेति ब्रूयादेतद् वै - [ ] **20**

**TS 3.3.7.3**

छन्दसां ँवीर्यमा श्रावयाऽस्तु श्रौषड् यज ये यजामहे वषट्कारो

य एवं ँवेद सवीर्यैरेव छन्दोभिरर्चति यत् किं चार्चति यदिन्द्रो

वृत्र-महन्नमेद्ध्यं तद्-यद्-यतीनपावपदमेद्ध्यं तदथ कस्मादैन्द्रो

यज्ञ आ स७स्थातोरित्याहुरिन्द्रस्य वा एषा यज्ञिया तनूर्यद्-

यज्ञस्तामेव तद् ( ) यजन्ति य एवं ँवेदोपैनं ँयज्ञो नमति ॥ **21**

*(छन्दसां ँवीर्यं - ँवा - एव त - दष्टौ च) (A7)*

**TS 3.3.8.1**

आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि ।

घृतं पीत्वा मधुचारु गव्यं पितेवपुत्रमभि रक्षतादिमं ॥

आ वृश्च्यते वा एतद्-यजमानोऽग्निभ्यां ँयदेनयोः

शृतंकृत्याथाऽन्यत्रा-वभृथमवैत्यायुर्दा अग्ने हविषो जुषाण

इत्यवभृथमवैष्यन् जुहुयादाहुत्यैवैनौ शमयति नाऽऽ*र्तिमार्च्छति

यजमानो यत् कुसीद - [ ] **22**

**TS 3.3.8.2**

मप्रतीत्तं मयि येन यमस्य बलिना चरामि ।

इहैव सन् निरवदये तदेतत् तदग्ने अनृणो भवामि ।

विश्वलोप विश्वदावस्य त्वा ऽऽसञ्जुहोम्यग्धादेको ऽहुतादेकः

समसनादेकः ।

तेनः कृण्वन्तु भेषजꣳ सदः सहो वरेण्यं ॥

अयं नो नभसा पुरः सꣳस्फानो अभि रक्षतु ।

गृहाणामसमर्त्यै बहवो नो गृहा असन्न् ॥

स त्वन्नो – [ ] **23**

**TS 3.3.8.3**

नभसस्पत ऊर्जं नो धेहि भद्रया ।

पुनर्नो नष्टमा कृधि पुनर्नो रयिमा कृधि ॥

देव सꣳस्फान सहस्रपोषस्येशिषे स नो रास्वाऽज्यानिꣳ रायस्पोषꣳ

सुवीर्यꣳ सँवथ्सरीणाꣳ स्वस्तिं ॥

अग्निर्वाव यम इयं ँयमी कुसीदं ँवा एतद्–यमस्य यजमान आ दत्ते

यदोषधीभिर्वेदिꣳ स्तृणाति यदनुपौष्य प्रयायाद् ग्रीवबद्धमेन–[ ] **24**

**TS 3.3.8.4**

ममुष्मिन् ँल्लोके नेनीयेरन्. यत् कुसीदमप्रतीत्तं मयीत्युपौषतीहैव सन् यमं कुसीदं निरवदायानृणः सुवर्गं ँल्लोकमेतियदि मिश्रमिव चरेदञ्जलिना सक्तून् प्रदाव्ये जुहुयादेष वा अग्निर्वैश्वानरो यत् प्रदाव्यः स एवैनꣳस्वदयत्यहां ँविधान्या-मेकाष्टकायामपूपं चतुश्शरावं पक्त्वा प्रातरेतेन कक्षमुपौषेद्यदि - [ ] 25

**TS 3.3.8.5**

दहति पुण्यसमं भवति यदि न दहति पापसममेतेन ह स्म वा ऋषयः पुरा विज्ञानेन दीर्घसत्रमुप यन्ति यो वा उपद्रष्टारमुप-श्रोतारमनुख्यातारं ँविद्वान्. यजते सममुष्मिन् ँल्लोक इष्टापूर्तेन गच्छतेऽग्निर्वा उपद्रष्टा वायुरुपश्रोता ऽऽदित्योऽनुख्याता तान्. य एवं ँविद्वान्. यजते सममुष्मिन् ँल्लोक इष्टापूर्तेन गच्छते ऽयं नो नभसा पुर - [ ] 26

**TS 3.3.8.6**

इत्याहाग्निर्वै नभसा पुरोऽग्निमेव तदाहैतन्मे गोपायेति स त्वं नो नभसस्पत इत्याह वायुर्वै नभसस्पतिर्वायुमेव तदाहैतन्मे गोपायेति

देव स॒ꣳस्फानेत्याहाऽसौ वा आ॒दित्यो दे॒वः स॒ꣳस्फान आदि॒त्यमे॒व

तदाहै॒तन्मे गोपा॒यति ॥ 27

*(कुसी॒दं – त्वं न – एन – मोषे॒द्यदि – पु॒र – आदि॒त्यमे॒व तदाहै॒ तन्मे गोपा॒येति) (A8)*

**TS 3.3.9.1**

ए॒तं ँयुवा॒नं परि वो ददामि तेन क्रीड॒न्तीश्चरत प्रि॒येण ।

मा नः शाप्त ज॒नुषा सुभागा रा॒यस्पोषे॒ण समि॒षा मदेम ॥

नमो महि॒म्न उ॒त चक्षुषे ते॒ मरुतां पि॒तस्त॒दहं गृणामि ।

अनु मन्यस्व सु॒यजा यजा॒म जुष्टं दे॒वाना॒मिदमस्तु ह॒व्यं ॥

दे॒वाना॒मेष उपना॒ह आसी॒दपां गर्भ॒ ओषधीषु॒ न्यक्तः ।

सोमस्य द्र॒प्समवृणीत पू॒षा – [ ] 28

**TS 3.3.9.2**

बृ॒हन्नद्रि॒रभव॒त् तदेषां ॥

पि॒ता व॒थ्सानां॒ पतिरघ्नि॒याना॒मथो पि॒ता मह॒तां गर्गराणां ।

व॒थ्सो ज॒रायु प्रति॒धुक् पी॒यूष आमि॒क्षा॒ मस्तु घृ॒तमस्य॒ रेतः ॥

त्वां गावोऽवृणत रा॒ज्याय॒ त्वाꣳ हवन्त म॒रुतः स्व॒र्काः ।

वर्ष्मन् क्षत्रस्य ककुभि शिश्रियाणस्ततो न उग्रो वि **भजा** वसूनि ॥

व्यृद्धेन वा एष पशुना यजते यस्यैतानि न क्रियन्त एष ( )

ह त्वै समृद्धेन यजते यस्यैतानि क्रियन्ते ॥ **29**

*(पूषा - क्रियन्त एषो - ऽष्टौ च) (A9)*

**TS 3.3.10.1**

सूर्यो देवो दिविषद्भ्यो धाता क्षत्राय वायुः प्रजाभ्यः ।

बृहस्पतिस्त्वा प्रजापतये ज्योतिष्मतीं जुहोतु ॥

यस्यास्ते हरितो गर्भोऽथो योनिर्. हिरण्ययी ।

अङ्गान्यह्रुता यस्यै तां देवैः समजीगमं ॥

आ वर्तन वर्तय नि निवर्तन वर्तयेन्द्र नर्दबुद ।

भूम्याश्चतस्रः प्रदिशस्ताभिरा **वर्तया** पुनः ॥

वि ते भिनद्मि तकरीं ँवि योनिं ँवि गवीन्यौ ।

वि - [ ] **30**

**TS 3.3.10.2**

मातरञ्च पुत्रं च वि गर्भं च जरायु च ॥

बहिस्ते अस्तु बालिति ॥

उरुद्रफ्सो विश्वरूप इन्दुः पवमानो धीर आनञ्ज गर्भं ॥

एकपदी द्विपदी त्रिपदी चतुष्पदी पञ्चपदी षट्पदी

सप्तपद्यष्टापदी भुवना ऽनु प्रथता॒ स्वाहा ॥

मही द्यौः पृथिवी च न इमं यँज्ञं मिमिक्षतां ।

पिपृतान्नो भरीमभिः ॥ **31**

*(गविन्यौ वि - चतुश्चत्वारिꣳशच्च) (A10)*

**TS 3.3.11.1**

इदं वाँ-मास्ये हविः प्रियमिन्द्राबृहस्पती ।

उक्थं मदश्च शस्यते ॥

अयं वाँं परि षिच्यते सोमइन्द्राबृहस्पती ।

चारुर्मदाय पीतये ॥

अस्मे इन्द्राबृहस्पती रयिं धत्तꣳ शतग्विनं ।

अश्वावन्तꣳ सहस्रिणं ॥

बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।

इन्द्रः पुरस्तादुत मद्ध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥

वि ते विष्वग्वातजूतासो अग्ने भामासः – [ ] **32**

**TS 3.3.11.2**

शुचे शुचयश्चरन्ति ।

तुविम्रक्षासो दिव्या नवग्वा वना वनन्ति धृषता रुजन्तः ॥

त्वामग्ने मानुषीरीडते विशो होत्राविदं ँविविचिᳪ रत्नधातमं ।

गुहा सन्तᳪ सुभग विश्वदर्.शतं तु विष्मणसᳪ सुयजं घृतश्रियं ॥

धाता ददातु नो रयिमीशानो जगतस्पतिः ।

स नः पूर्णेन वावनत् ॥

धाता प्रजाया उत राय ईशे धातेदं ँविश्वं भुवनं जजान ।

धाता पुत्रं ँयजमानाय दाता – [ ] **33**

**TS 3.3.11.3**

तस्मा उ हव्यं घृतवद्विधेम ॥

धाता ददातु नो रयिं प्राचीं जीवातुमक्षितां ।

वयं देवस्य धीमहि सुमति॒ँ सत्यराधसः ॥

धाता ददातु दाशुषे वसूनि प्रजाकामाय मीढुषे दुरोणे ।

तस्मै देवा अमृताः सं व्ँव्ययन्तां विश्वे देवासो अदितिः सजोषाः ॥

अनु नोऽद्याऽनुमतिर्यज्ञं देवेषु मन्यतां ।

अग्निश्च हव्यवाहनो भवतां दाशुषे मयः ॥

अन्विदनुमते त्वं – [ ] **34**

**TS 3.3.11.4**

मन्यासै शञ्चनः कृधि ।

क्रत्वे दक्षाय नो हिनु प्र ण आयू॒ँषि तारिषः ॥

अनु मन्यता–मनुमन्यमाना प्रजावन्त॒ँ रयिमक्षीयमाणं ।

तस्यै वय॒ँ हेडसि मा ऽपि भूम सा नो देवी सुहवा शर्म यच्छतु ॥

यस्यामिदं प्रदिशि यद्विरोचतेऽनुमतिं प्रति भूषन्त्यायवः ।

यस्या उपस्थ उर्वन्तरिक्ष॒ँ सा नो देवी सुहवा

शर्म यच्छतु ॥ **35**

**TS 3.3.11.5**

राकामहꣳ सुहवाꣳ सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना ।
सीव्यत्वपः सूच्याऽच्छिद्यमानया ददातु वीरꣳ शतदायमुक्थ्यं ॥
यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ।
ताभिर्नो अद्य सुमना उपागहि सहस्रपोषꣳ सुभगे रराणा ॥
सिनीवालि >[1], या सुपाणिः >[2] ॥
कुहूमहꣳ सुभगां विद्मनापसमस्मिन्. यज्ञे सुहवां जोहवीमि ।
सा नो ददातु श्रवणं ( ) पितृणां तस्यास्ते देवि हविषा विधेम ॥
कुहू–र्देवानाममृतस्य पत्नी हव्या नो अस्य हविषश्चिकेतु ।
सं दाशुषे किरतु भूरि वामꣳ रायस्पोषं चिकितुषे दधातु ॥ **36**

*(भामासो – दाता – त्व – मन्तरिक्षꣳ सा नो देवी सुहवा शर्म यच्छतु –श्रवणं – चतुर्विꣳशतिश्च) (A11)*

================

**Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-**

(अग्ने तेजस्विन् – वायु – र्वसव– स्तवैतद्वा अपां – ँवायुरसि प्राणो नाम – देवा वै यद्यज्ञेनन – प्रजापति र्देवासुरा – नायुर्दा – एतं ँयुवान॒ं – सूर्यो देव – इदं ँवा – मेकादश)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(अग्ने तेजस्विन् – वायुरसि – छन्दसां ँवीर्यं – मातरञ्च – षट्त्रिꣳशत् )

**First and Last Padam of Third Prasnam of Kandam 3 :-**

(अग्ने तेजस्विꣳ – श्चिकितुषे दधातु )

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां तृतीयकाण्डे तृतीयः प्रश्नः समाप्तः ॥

## 3.3.1 Appendix

**3.3.11.5 – सिनीवालि >[1], या सुपाणिः >[2]**

**सिनीवालि** पृथुष्टुके या देवानामसि स्वसा ।
जुषस्व हव्य माहुतं प्रजां देवि दिदिड्ढि नः ॥

**या सुपाणिः** स्वङ्गुरिः सुषूमा बहुसूवरी ।
तस्यै विश्पत्नियै हविः सिनीवाल्यै जुहोतन ॥

(Appearing in TS- **3.1.11.4)**

--------------------------------

ओं नमः परमात्मने, श्री महागणपतये नमः, श्री गुरुभ्यो नमः

हरिः ओं

## 3.4 तृतीयकाण्डे चतुर्थः प्रश्नः – इष्टिहोमाभिधानं

**TS 3.4.1.1**

वि वा एतस्य यज्ञ ऋद्ध्यते यस्य हविरतिरिच्यते सूर्यो देवो दिविषद्भ्य इत्याह बृहस्पतिना चैवास्य प्रजापतिना च यज्ञस्य व्यृद्धमपि वपति रक्षाꣳसि वा एतत् पशुꣳ सचन्ते यदेकदेवत्य आलब्धो भूयान् भवति यस्यास्ते हरितो गर्भ इत्याह देवत्रैवैनां गमयति रक्षसामपहत्या आ वर्तन वर्तयेत्याह – [ ] 1

**TS 3.4.1.2**

ब्रह्मणैवैनमा वर्तयति वि ते भिनद्मि तकरीमित्याह यथायजुरेवैतदुरुद्रप्सो विश्वरूप इन्दुरित्याह प्रजा वै पशव इन्दुः प्रजयैवैनं पशुभिः समर्द्धयति दिवं ँवै यज्ञस्य व्यृद्धं गच्छति पृथिवीमतिरिक्तं तद्यन्न शमयेदार्तिमार्च्छेद्–यजमानो मही द्यौः पृथिवीच न इत्या – [ ] 2

**TS 3.4.1.3**

ह द्यावापृथिवीभ्यामेव यज्ञस्य व्यृद्धं चातिरिक्तं च शमयति

नाऽऽ*र्तिमार्च्छति यजमानो भस्मना ऽभि समूहति स्वगाकृत्या अथो

अनयोर्वा एष गर्भोऽनयोरेवैनं दधाति यदवद्येदति तद् रेचयेद्

यन्नावद्येत् पशोरालब्धस्य नाऽव द्येत् पुरस्तान्नाभ्या

अन्यदवद्येदुपरिष्टादन्यत् पुरस्ताद्वै नाभ्यै – [ ] 3

**TS 3.4.1.4**

प्राण उपरिष्टादपानो यावानेव पशुस्तस्याव द्यति विष्णवे शिपिविष्टाय

जुहोति यद्वै यज्ञस्यातिरिच्यते यः पशोर्भूमा या पुष्टिस्तद्–विष्णुः

शिपिविष्टो ऽतिरिक्त एवातिरिक्तं दधात्यतिरिक्तस्य शान्त्या

अष्टाप्रूड्ढिरण्यं दक्षिणाऽष्टापदी ह्येषा ऽऽत्मा नवमः पशोराप्त्या

अन्तरकोश उष्णीषेणाऽऽ*विष्टितं भवत्येवमिव हि पशुरुल्बमिव ( )

चर्मेव माꣳसमिवास्थीव यावानेव पशु–स्त–माप्त्वाऽव रुन्धेयस्यैषा

यज्ञे प्रायश्चित्तिः क्रियत इष्ट्वा वसीयान् भवति ॥ 4

*(वर्तयत्याह–न इति–वै नाभ्या–उल्बमिवै–कविꣳशतिश्च) (A1)*

**TS 3.4.2.1**

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।
उपो ते अन्धो मद्य–मयामि यस्य देव दधिषे पूर्वपेयं ॥
आकूत्यै त्वा कामाय त्वा समृधे त्वा किक्किटा ते मनः प्रजापतये
स्वाहा किक्किटा ते प्राणं वायवे स्वाहा किक्किटा ते चक्षुः सूर्याय
स्वाहा किक्किटा ते श्रोत्रं द्यावापृथिवीभ्या॒ स्वाहा किक्किटा ते
वाच॒ं सरस्वत्यै स्वाहा– [ ] 5

**TS 3.4.2.2**

त्वं तुरीया वशिनी वशाऽसि सकृद् यत् त्वा मनसा गर्भ आ ऽशयत् ।
वशा त्वं वशिनी गच्छ देवान्थ्–सत्याः सन्तु यजमानस्य कामाः ॥
अजा ऽसि रयिष्ठा पृथिव्या॒ं सीदोर्द्ध्वाऽन्तरिक्षमुप तिष्ठस्व दिवि ते
बृहद् भाः ॥
तन्तुं तन्वन् रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान् ॥
अनुल्बणं वयत जोगुवा–मपो मनु ( ) र्भव जनया दैव्यं जनं ॥
मनसो हविरसि प्रजापतेर्वर्णो गात्राणां ते गात्रभाजो भूयास्म ॥ 6

*(सरस्वत्यै स्वाहा – मनु – स्त्रयोदश च) (A2)*

**TS 3.4.3.1**

इमे वै सहाऽऽ*स्तां ते वायुर्व्यवात् ते गर्भमदधातां त॰ँ सोमः

प्राजनय-दग्निरग्रसत स एतं प्रजापतिराग्नेय-मष्टाकपालमपश्यत् तं

निरवपत् तेनैवैनामग्नेरधि निरक्रीणात् तस्मादप्यन्यदेवत्यामालभमान

आग्नेयमष्टाकपालं पुरस्तान्निर्वपेदग्ने-रेवैनामधि

निष्क्रीयाऽऽलभते यद् - [ ] **7**

**TS 3.4.3.2**

वायुर्व्यवात् तस्माद्-वायव्या यदिमे गर्भमदधातां तस्माद्-

द्यावापृथिव्या यथ् सोमः प्राजनयदग्निरग्रसत तस्मादग्नीषोमीया

यदनयोर्वियत्योर्वागवदत् तस्माथ् सारस्वती यत् प्रजापतिरग्नेरधि

निरक्रीणात् तस्मात् प्राजापत्या सा वा एषा सर्वदेवत्या यदजा वशा

वायव्यामा लभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव

स्वेन- [ ] **8**

**TS 3.4.3.3**

भागधेयेनोप धावति स एवैनं भूतिं गमयति द्यावापृथिव्यामा लभेत

कृषमाणः प्रतिष्ठाकामो दिव एवास्मै पर्जन्यो वर्.षति व्यस्यामोषधयो

रोहन्ति समर्द्धुकमस्य सस्यं भवत्यग्नीषोमीयामा लभेत यः कामयेतान्नवानन्नादः स्यामित्यग्निनैवान्नमव रुन्धे सोमेनान्नाद्य–मन्नवानेवान्नादो भवति सारस्वतीमा लभेत य – [ ] **9**

**TS 3.4.3.4**

ईश्वरो वाचो वदितोः सन् वाचं नवदेद्–वाग्वै सरस्वती सरस्वतीमेव स्वेन भागधेयेनोप धावति सैवास्मिन् वाचं दधाति प्राजापत्यामा लभेत यः कामयेतानभिजितमभि जयेयमिति प्रजापतिः सर्वा देवता देवताभिरेवा–नभिजितमभि जयति वायव्ययोपाकरोति वायोरेवैनामवरुद्ध्या ऽऽलभत आकूत्यै त्वा कामाय त्वे – [ ] **10**

**TS 3.4.3.5**

त्याह यथायजुरेवैतत् किक्किटाकारं जुहोति किक्किटाकारेण वै ग्राम्याः पशवो रमन्ते प्राऽऽ*रण्याः पतन्ति यत् किक्किटाकारं जुहोति ग्राम्याणां पशूनां धृत्यै पर्यग्नौ क्रियमाणे जुहोति जीवन्तीमेवैनाꣳ सुवर्गं ँलोकं गमयति त्वं तुरीया वशिनी वशाऽसीत्याह देवत्रैवैनां गमयति सत्याः सन्तु यजमानस्य कामा इत्याहैष वै कामो –[ ] **11**

**TS 3.4.3.6**

यजमानस्य यदनार्त उदृचं गच्छति तस्मादेवमाहाऽजाऽसि

रयिष्ठेत्याहैष्वेवैनां ँल्लोकेषु प्रति ष्ठापयति दिवि ते बृहद् भा इत्याह

सुवर्ग एवास्मै लोके ज्योतिर् दधाति तन्तुं तन्वन् रजसो

भानुमन्विहीत्याहेमानेवास्मै लोकान् ज्योतिष्मतः करोत्यनुल्बणं

ँवयत जोगुवा-मप इत्या-[ ] 12

**TS 3.4.3.7**

-ह यदेव यज्ञ उल्बणं क्रियते तस्यैवैषा शान्तिर्मनुर्भव

जनया दैव्यं जनमित्याह मानव्यो वै प्रजास्ता एवाऽऽ*द्याः

कुरुते मनसो हविरसीत्याह स्वगाकृत्यै गात्राणां ते गात्रभाजो

भूयास्मेत्याहाऽऽ*शिषमेवैतामा शास्ते तस्यै वा एतस्या

एकमेवादेवयजनं ँयदालब्धायामभ्रो – [ ] 13

**TS 3.4.3.8**

भवति यदालब्धायामभ्रः स्यादप्सु वाप्रवेशयेथ् सर्वां ँवा

प्राश्ञीयाद् यदप्सु प्रवेशयेद् यज्ञवेशसं कुर्याथ् सर्वामेव

प्राश्ञीयादिन्द्रियमेवाऽऽ*त्मन् धत्ते सा वा एषा त्रयाणामेवाव

रुद्धा सँवथ्सरसदः सहस्रयाजिनो गृहमेधिनस्त एवैतया

यजेरन् तेषामेवैषा ऽऽप्ता ॥ **14**

*(यथ् - स्वेन - सारस्वतीमा लभेत यः - कामाय त्वा - कामो - ऽप इत्य - श्नो - द्विचत्वारिं॑शच्च) (A3)*

**TS 3.4.4.1**

चित्तं च चित्तिश्चाऽऽकूतं चाऽऽकूतिश्च विज्ञातं च विज्ञानं च

मनश्च शक्वरीश्च दर्.शश्च पूर्णमासश्च बृहच्च रथन्तरं च

प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाज्येषु तस्मै विशः

स–मनमन्त सर्वाः स उग्रः सहि हव्यो बभूवदेवासुराः सँयत्ता

आसन्थ् स इन्द्रः प्रजापतिमुपाऽ ( ) धावत् तस्मा एताञ्जयान्

प्रायच्छत् तानजुहोत् ततो वै देवा असुरानजयन्. यदजयन् तज्जयानां

जयत्वं स्पर्द्धमानेनैते होतव्या जयत्येव तां पृतनां ॥ **15**

*(उप - पञ्चविं॑शतिश्च) (A4)*

**TS 3.4.5.1**

अग्निर्भूतानामधिपतिः स मा ऽवत्विन्द्रो ज्येष्ठानां ँयमः पृथिव्या

वायुरन्तरिक्षस्य सूर्योदिवश्चन्द्रमा नक्षत्राणां बृहस्पतिर्ब्रह्मणो

मित्रः सत्यानां ँवरुणोऽपाꣳ समुद्रः स्रोत्यानामन्नꣳ

साम्राज्यानामधिपति तन्मा ऽवतु सोम ओषधीनाꣳ सविता प्रसवानाꣳ

रुद्रः पशूनां त्वष्टा रूपाणां ँविष्णुः पर्वतानां मरुतो

गणानामधिपतयस्ते माऽवन्तु पितरः पितामहाः परे ऽवरे ( )

तता–स्ततामहा इह मा ऽवत ।

अस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्

कर्मन्नस्यां देवहूत्यां ॥ **16** ***(अवरे – सप्तदश च) (A5)***

**TS 3.4.6.1**

देवा वै यद् यज्ञे ऽकुर्वत तदसुरा अकुर्वत ते देवा

एतानभ्यातानानपश्यन् तानभ्यातन्वत यद् देवानां कर्माऽऽ*सीदार्द्ध्यत

तद् यदसुराणां न तदार्द्ध्यत येन कर्मणेर्थ्सेत् तत्र होतव्या ऋद्ध्नोत्येव

तेन कर्मणा यद्विश्वे देवाः समभरन् तस्मादभ्याताना वैश्वदेवायत्–

प्रजापतिर्जयान् प्रायच्छत् तस्माज्जयाः प्राजापत्या – [ ] **17**

**TS 3.4.6.2**

यद्-राष्ट्रभृद्भी राष्ट्रमाऽददत तद्-राष्ट्रभृताꣳ राष्ट्रभृत्त्वं ते देवा अभ्यातानैरसुरानभ्यातन्वत जयैरजयन्-राष्ट्रभृद्भी राष्ट्रमाऽददत यद्देवा अभ्याता-नैरसुरानभ्यातन्वत तदभ्यातानानामभ्यातानत्वं यँज्जयैरजयन् तज्जयानां जयत्वं यँद्-राष्ट्रभृद्भी राष्ट्रमाऽददत तद्-राष्ट्रभृताꣳ राष्ट्रभृत्त्वं ततो देवा अभवन् पराऽसुरा यो भ्रातृव्यवान्थ् स्याथ् स ( ) एतान् जुहुयादभ्यातानैरेव भ्रातृव्यानभ्यातनुते जयैर्जयति राष्ट्रभृद्भी राष्ट्रमा दत्ते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति ॥ 18 *(प्राजापत्याः-सोऽ-ष्टा दश च) (A6)*

**TS 3.4.7.1**

ऋताषाड् ऋतधामाऽग्नि-र्गन्धर्वस्त-स्यौषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ताभ्यः स्वाहा सꣳहितो विश्वसामा सूर्यो गन्धर्व-स्तस्य मरीचयोऽप्सरस आयुवः सुषुम्नः सूर्यरश्मि-श्चन्द्रमा गन्धर्व-स्तस्य नक्षत्राण्यप्सरसो बेकुरयोभुज्युः सुपर्णो यज्ञो गन्धर्व-स्तस्य दक्षिणा अप्सरस स्तवाः प्रजापति-र्विश्वकर्मा मनो - [ ] 19

**TS 3.4.7.2**

गन्धर्वस्तस्यर्ख्सामान्यफ्सरसो वह्नयइषिरो विश्वव्यचा वातो

गन्धर्व-स्तस्याऽऽ*पो ऽफ्सरसो मुदाभुवनस्य पते यस्य त उपरि

गृहा इह च ।

स नो रास्वाऽज्यानिꣳ रायस्पोषꣳ सुवीर्यꣳ संवँथ्सरीणाꣳ स्वस्तिं ॥

परमेष्ठ्यधिपति-र्मृत्युर् गन्धर्व-स्तस्य विश्वमफ्सरसो भुवः सुक्षितिः

सुभूति-र्भद्रकृथ् सुवर्वान् पर्जन्यो गन्धर्व-स्तस्य विद्युतो ऽफ्सरसो

रुचो दूरेहेति-रमृडयो - [ ] **20**

**TS 3.4.7.3**

मृत्युर्गन्धर्व-स्तस्य प्रजा अफ्सरसो भीरुवश्चारुः कृपणकाशी

कामो गन्धर्व-स्तस्याधयो ऽफ्सरसः शोचयन्तीर्नाम स इदं ब्रह्म

क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ताभ्यः स्वाहा स

नो भुवनस्य पते यस्य त उपरि गृहा इह च ।

उरु ब्रह्मणे ऽस्मै क्षत्राय महि शर्म यच्छ ॥ **21**

*(मनो - ऽमृडयः - षट्चत्वारिꣳशच्च) (A7)*

**TS 3.4.8.1**

राष्ट्रकामाय होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रेणैवास्मै राष्ट्रमव रुन्धे राष्ट्रमेव भवत्यात्मने होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रं प्रजा राष्ट्रं पशवो राष्ट्रं यच्छ्रेष्ठो भवति राष्ट्रेणैव राष्ट्रमव रुन्धे वसिष्ठः समानानां भवति ग्रामकामाय होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रꣳ सजाता राष्ट्रेणैवास्मै राष्ट्रꣳ सजातानव रुन्धे ग्राम्ये – [ ] **22**

**TS 3.4.8.2**

–व भवत्यधिदेवने जुहोत्यधिदेवन एवास्मै सजातानव रुन्धे त एनमवरुद्धा उप तिष्ठन्ते रथमुख ओजस्कामस्य होतव्या ओजो वै राष्ट्रभृत ओजो रथ ओजसैवास्मा ओजोऽव रुन्ध ओजस्व्येव भवति यो राष्ट्रादपभूतः स्यात् तस्मै होतव्या यावन्तोऽस्य रथाः स्यु–स्तान् ब्रूयाद् युङ्ध्व–मिति राष्ट्रमेवास्मै युनक्त्या – [ ] **23**

**TS 3.4.8.3**

हुतयो वा एतस्याक्लृप्ता यस्य राष्ट्रं न कल्पते स्वरथस्य दक्षिणं चक्रं प्रवृह्य नाडीमभि जुहुयादाहुतीरेवास्य कल्पयति ता अस्य कल्पमाना राष्ट्रमनु कल्पते संग्रामे सँयत्ते होतव्या राष्ट्रं वै

राष्ट्रभृतो राष्ट्रे खलु वा एते व्यायच्छन्ते ये सङ्ग्राम९ सँयन्ति
यस्य पूर्वस्य जुह्वति स एव भवति जयति त९ संग्रामं मान्धुक
इद्ध्मो– [ ] 24

**TS 3.4.8.4**

भवत्यङ्गारा एव प्रतिवेष्टमाना अमित्राणामस्य सेनां
प्रति वेष्टयन्ति य उन्माद्येत् तस्मै होतव्या गन्धर्वाफ्सरसो वा
एतमुन्मादयन्ति य उन्माद्यत्येते खलु वै गन्धर्वाफ्सरसो
यद्राष्ट्रभृतस्तस्मै स्वाहा ताभ्यः स्वाहेति जुहोति तेनैवैनाञ्छमयति
नैयग्रोध औदुम्बर आश्वत्थः प्लाक्ष इतीद्ध्मो भवत्येते वै
गन्धर्वाफ्सरसां गृहाः स्व एवैना – [ ] 25

**TS 3.4.8.5**

नायतने शमयत्यभिचरता प्रतिलोम९ होतव्याः प्राणानेवास्य
प्रतीचः प्रति यौति तं ततो येन केन च स्तृणुते स्वकृत इरिणे
जुहोति प्रदरे वैतद्वा अस्यै निर्.ऋतिगृहीतं निर्.ऋतिगृहीत एवैनं
निर्.ऋत्या ग्राहयति यद्वाचः क्रूरं तेन वषट् करोति वाच एवैनं क्रूरेण
प्र वृश्चति ताजगार्तिमार्च्छति यस्य कामयेतान्नाद्य – [ ] 26

**TS 3.4.8.6**

मा ददीयेति तस्य सभायामुत्तानो निपद्य भुवनस्य पत इति

तृणानि सं गृह्णीयात् प्रजापतिर्वै भुवनस्य पतिः

प्रजापतिनैवास्यान्नाद्यमा दत्त इदमहममुष्या ऽऽ*मुष्यायणस्यान्नाद्यं

हरामीत्याहान्नाद्यमेवास्य हरति षड्भिर्. हरति षड्वा ऋतवः

प्रजापतिनैवास्या–न्नाद्यमादायर्तवोऽस्मा अनु प्र यच्छन्ति – [ ] 27

**TS 3.4.8.7**

यो ज्येष्ठबन्धुरप भूतः स्यात् तꣳस्थलेऽवसाय्य ब्रह्मौदनं चतुश्शरावं

पक्त्वा तस्मै होतव्या वर्ष्म वै राष्ट्रभृतो वर्ष्म स्थलं वर्ष्मणैवैनं

वर्ष्म समानानां गमयति चतुश्शरावो भवति दिक्ष्वेव प्रति तिष्ठति

क्षीरे भवति रुचमेवास्मिन् दधात्युद्धरति शृतत्वाय सर्पिष्वान् भवति

मेद्ध्यत्वाय चत्वार आर्.षेयाः प्राश्ञन्ति दिशामेव ज्योतिषि

जुहोति ॥ 28 *(ग्रामी – युनक्ती – ध्मः – स्व एवैना – नन्नाद्यं –*

*यच्छन्त्ये – कान्नपञ्चाशच्च) (A8)*

**TS 3.4.9.1**

देविका निर्वपेत् प्रजाकामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसीव

खलु वै प्रजाश्छन्दोभिरेवास्मै प्रजाः प्र जनयति प्रथमं धातारं

करोति मिथुनी एव तेन करोत्यन्वेवास्मा अनुमतिर्मन्यते राते राका

प्र सिनीवाली जनयति प्रजास्वेव प्रजातासु कुह्वा वाचं दधात्येता एव

निर्वपेत् पशुकामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसी - [ ] **29**

**TS 3.4.9.2**

व खलु वै पशवश्छन्दोभिरेवास्मै पशून् प्र जनयति प्रथमं धातारं

करोति प्रैव तेन वापयत्यन्वेवास्मा अनुमतिर्मन्यते राते राका प्र

सिनीवाली जनयति पशूनेव प्रजातान् कुह्वा प्रति ष्ठापयत्येता एव

निर्वपेद्-ग्रामकामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसी व खलु वै

ग्रामश्छन्दोभिरेवास्मै ग्राम - [ ] **30**

**TS 3.4.9.3**

मव रुन्धे मद्ध्यतो धातारं करोति मद्ध्यत एवैनं ग्रामस्य दधात्येता

एव निर्वपेज्ज्योगामयावी छन्दाꣳसि वै देविकाश्छन्दाꣳसि खलु वा

एतमभि मन्यन्ते यस्य ज्योगामयति छन्दोभिरेवैन-मगदं करोति

मद्ध्यतो धातारं करोति मद्ध्यतो वा एतस्याक्लृप्तं ँयस्य
ज्योगामयति मद्ध्यत एवास्य तेन कल्पयत्येता एव नि – [ ] 31

**TS 3.4.9.4**

र्वपेद्यं ँयज्ञो नोपनमेच्छन्दाꣳसि वै देविकाश्छन्दाꣳसि खलु
वा एतं नोप नमन्ति यं ँयज्ञो नोपनमति प्रथमं धातारं करोति
मुखत एवास्मै छन्दाꣳसि दधात्युपैनं ँयज्ञो नमत्येता एव
निर्वपेदीजानश्छन्दाꣳसि वै देविका यातयामानीव खलु वा
एतस्य छन्दाꣳसि य ईजान उत्तमं धातारं करो – [ ] 32

**TS 3.4.9.5**

–त्युपरिष्टादेवास्मै छन्दाꣳस्ययातयामान्यव रुन्ध उपैनमुत्तरो
यज्ञो नमत्येता एव निर्वपेद्यं मेधा नोपनमेच्छन्दाꣳसि वै
देविकाश्छन्दाꣳसि खलु वा एतं नोप नमन्ति यं मेधा नोपनमति
प्रथमं धातारं करोति मुखत एवास्मै छन्दाꣳसि दधात्युपैनं
मेधा नमत्येता एव निर्वपे – [ ] 33

**TS 3.4.9.6**

दुक्कामश्छन्दा॑ꣳसि॒ वै दे॑विका॒श्छन्दा॑ꣳसीव॒ खलु॒ वै रुक्

छन्दो॑भि॒रेवास्मि॒न् रुचं॑ दधातिक्षी॒रे भ॑वन्ति॒ रुचमे॒वास्मिन् दधति

मद्ध्यतो॒ धा॒तारं॑ करोति मद्ध्य॒त ए॒वैनꣳ॑ रु॒चो द॑धातिगाय॒त्री वा

अनु॑मतिस्त्रि॒ष्टुग्रा॒का ज॑गती सिनीवा॒ल्य॑नु॒ष्टुप् कु॑हू॒र्द्धा॒ता व॑षट्का॒रः

पू॒र्वप॒क्षो रा॒काऽप॑रप॒क्षः कु॒हू॑रमावा॒स्या॑ सिनीवा॒ली

पौ॒र्णमा॒स्य॑नुमति॒श्च॑न्द्रमा धा॒ताऽष्टौ – [ ] **34**

**TS 3.4.9.7**

वसवो॒ऽष्टाक्ष॑रा गाय॒त्र्येका॑दश रु॒द्रा एका॑दशाक्षरा त्रि॒ष्टुब्

द्वा॑दशाऽऽ*दि॒त्या द्वा॑दशाक्ष॒रा ज॑गती प्र॒जाप॑तिरनु॒ष्टुब् धा॒ता व॑षट्का॒र

ए॒तद्वै दे॑वि॒काः सर्वा॑णि च॒ छन्दा॑ꣳसि॒ सर्वा॑श्च दे॒वता॑ वषट्का॒रस्ता

यथ् स॒ह सर्वा॑ नि॒र्वपे॑दीश्व॒रा ए॑नं प्र॒दहो॒ द्वे प्र॑थ॒मे नि॒रुप्य॑ धा॒तुस्तृ॒तीयं॒

नि॑र्वपे॒त् त॑थो ए॒वोत्त॒रे॑ निर्वपे॒त् त॑थै॒नं न प्र द॑ह॒न्त्य ( ) थो॒ यस्मै॒

का॑माय नि॒रुप्य॒न्ते त॒मेवाऽऽ॒भि–रु॑पाऽऽ*प्नोति ॥ **35**

*(पशुकामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसि-ग्रामं-कल्पयत्येता एव नि-रुत्तमन्धातारं करोति - मेधा नमत्येता एव निर्वपे - दष्टौ - दहन्ति - नव च) (A9)*

**Special Korvai:**

**(देविकाः प्रजाकामो मिथुनी पशुकामः प्रैव ग्रामकामो ज्योगामयावी यं यँज्ञो य ईजानो यं मेधा रुक्कामोऽष्टौ ।**

**देविका भवन्ति दधति राष्ट्रकामाय भवति दधाति ।)**

**TS 3.4.10.1**

वास्तोष्पते प्रति जानी ह्यस्मान्थ् स्वावेशो अनमीवो भवा नः ।

यत् त्वेमहे प्रति तन्नो जुषस्व शन्न एधि द्विपदे शञ्चतुष्पदे ॥

वास्तोष्पते शग्मया सꣳसदा ते सक्षीमहि रण्वया गातुमत्या ।

आवः क्षेम उत योगे वरन्नो यूयं पात स्वस्तिभिः सदा नः ॥

यथ् सायंप्रातरग्निहोत्रं जुहोत्याहुतीष्टका एव ता उप धत्ते - [ ] **36**

**TS 3.4.10.2**

यजमानोऽहोरात्राणि वा एतस्येष्टका य आहिताग्निर्यथ्

सायं प्रातर्जुहोत्यहोरात्राण्येवा ऽऽ*प्त्वेष्टकाः कृत्वोप धत्ते दश

समानत्र जुहोति दशाक्षरा विराड् विराजमेवा ऽऽप्त्वेष्टकां कृत्वोप
धत्ते ऽथो विराज्येव यज्ञमाप्नोति चित्यश्चित्यो ऽस्य भवति तस्माद्
यत्र दशोषित्वा प्रयाति तद्-यज्ञवास्त्ववास्त्वेव तद् यत्
ततोऽर्वाचीनꣳ - [ ] **37**

**TS 3.4.10.3**

रुद्रः खलु वै वास्तोष्पतिर्यदहुत्वा वास्तोष्पतीयं प्रयायाद् रुद्र एनं
भूत्वाऽग्निरनूत्थाय हन्याद् वास्तोष्पतीयं जुहोति भागधेयेनैवैनꣳ
शमयति नाऽऽ*र्तिमार्च्छति यजमानो यद् युक्ते जुहुयाद्यथा प्रयाते
वास्तावाहुतिं जुहोति तादृगेव तद् यदयुक्ते जुहुयाद् यथा क्षेम
आहुतिं जुहोति तादृगेव तदहुतमस्य वास्तोष्पतीयꣳ स्या - [ ] **38**

**TS 3.4.10.4**

दक्षिणो युक्तो भवति सव्योऽयुक्तोऽथ वास्तोष्पतीयं जुहोत्युभयमेवाऽ
करपरिवर्गमेवैनꣳ शमयति यदेकया जुहुयाद् दर्विहोमं कुर्यात्
पुरोनुवाक्या मनूच्य याज्यया जुहोति सदेवत्वाय यद्धुत आदद्ध्याद्
रुद्रं गृहानन्वारोहयेद्-यदवक्षाणान्यसंप्रक्षाप्य प्रयायाद् यथा

यज्ञवेशसं ँवाऽऽदहनं ँवा तादृगेव तदयन्ते योनिर्.ऋत्विय इत्यरण्योः समारोहय - [ ] 39

**TS 3.4.10.5**

-त्येष वा अग्नेर्योनिः स्व एवैनं ँयोनौ समारोहयत्यथो खल्वाहुर्यदरण्योः समारूढो नश्येदुदस्याग्निः सीदेत् पुनराधेयः स्यादिति या ते अग्ने यज्ञिया तनूस्तयेह्या रोहेत्यात्मन्थ् समारोहयते यजमानो वा अग्नेर्योनिः स्वायामेवैनं ँयोन्याꣳ समारोहयते ॥ 40

*(धत्ते-ऽर्वाचीनꣳ -स्याथ्-समारोहयति -पञ्चचत्वारिꣳशच्च)* *(A10)*

**TS 3.4.11.1**

त्व-मग्ने बृहद् वयो दधासि देव दाशुषे ।
कविर्गृहपतिर्युवा ॥
हव्यवाडग्नि-रजरः पिता नो विभुर्विभावा सुदृशीको अस्मे ।
सुगार्.हपत्याः समिषो दिदीह्यस्मद्रियख् सं मिमीहि श्रवाꣳसि ॥
त्वं च सोम नो वशो जीवातुं न मरामहे ।
प्रियस्तोत्रो वनस्पतिः ॥

ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणां ।
श्येनो गृद्ध्राणाᳶ स्वधिति र्वनानाᳶ सोमः – [ ] 41

**TS 3.4.11.2**

पवित्रमत्येति रेभन्न् ॥
आ विश्वदेवᳶ सत्पतिᳶ सूक्तैरद्या वृणीमहे ।
सत्यसवᳶ सवितारं ॥
आसत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च ।
हिरण्ययेन सविता रथेना ऽऽ देवो याति भुवना विपश्यन्न् ॥
यथा नो अदितिः करत् पश्वे नृभ्यो यथा गवे ।
यथा तोकाय रुद्रियं ॥
मा नस्तोके तनये मा न आयुषि मा नो गोषु मा– [ ] 42

**TS 3.4.11.3**

नो अश्वेषु रीरिषः ।
वीरान् मा नो रुद्र भामितो वधीर्. हविष्मन्तो नमसा विधेम ते ॥
उदप्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव घोषाः ।
गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्यर्का अनावन्न् ॥

ह॒ꣳसैरि॑व सखि॑भि॒र्वाव॑दद्भिरश्म॒न्मया॑नि॒ नह॑ना॒ व्यस्य॑न्न् ।
बृ॒हस्पति॑रभि॒कनि॑क्र॒दद्गा उ॒त प्रास्तौ॒दुच्च॑ वि॒द्वाꣳ अ॑गायत् ॥
ए॑न्द्र॒ सान॒सिꣳ र॒यिꣳ – [ ] **43**

**TS 3.4.11.4**

स॒जित्वा॑नꣳ सदा॒सह॑ᳲ ।
वर्.षि॑ष्ठमू॒तये॑ भर ॥
प्र स॑साहिषे पुरुहू॒त श॒त्रून् ज्येष्ठ॑स्ते॒ शुष्म॑ इ॒ह रा॒तिर॑स्तु ।
इन्द्राऽऽ भ॒॑र दक्षि॑णे॒ना वसू॑नि॒ प॑ति॒ः सिन्धू॑नामसि॒ रे॑वती॒नां ॥
त्वꣳ सु॒तस्य॑ पी॒तये॑ स॒द्यो वृ॒द्धो अ॑जायथाः ।
इन्द्र॒ ज्यैष्ठ्या॑य सुक्रतो ॥
भुव॒-स्त्व-मि॑न्द्र॒ ब्रह्म॑णा म॒हान् भुवो॒ विश्वे॑षु॒ सव॑नेषु य॒ज्ञियः॑ ।
भुवो॒नॄꣳश्च्यौ॒त्नो विश्व॑स्मि॒न् भ॑रे॒ ज्येष्ठ॑श्च॒ मन्त्रो॑ – [ ] **44**

**TS 3.4.11.5**

विश्वचर्.षणे ॥
मि॒त्रस्य॑ चर्.षणी॒धृ॒तः श्रवो॑ दे॒वस्य॑ सान॒सिं ।
स॒त्यं चि॒त्रश्र॑वस्तमं ॥

मित्रो जनान् यातयति प्रजानन् मित्रो दाधार पृथिवीमुत द्यां ।
मित्रः कृष्टीरनिमिषाऽभि चष्टे सत्याय हव्यं घृतवद्–विधेम ॥
प्र स मित्र मर्तो अस्तु प्रयस्वान्. यस्त आदित्य शिक्षति व्रतेन ।
न हन्यते न जीयते त्वोतो नैनम॒ꣳहो अश्ञोत्यन्तितो न दूरात् ॥
य– [ ] **45**

**TS 3.4.11.6**

च्चिद्धि ते विशो यथा प्र देव वरुण व्रतं ।
मिनीमसि द्यविद्यवि ॥
यत् किञ्चेदं वँरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि ।
अचित्तीयत् तव धर्मा युयोपिममा नस्तस्मादेनसो देव रीरिषः ॥
कितवासो यद् रिरिपुर्न दीवि यद् वा **घा** सत्यमुतयन्न विद्म ।
सर्वा ता विष्य शिथिरे–( )–व देवाऽ**था** ते स्याम
वरुण प्रियासः ॥ **46**

*(सोमो–गोषु मा– रयिं – मन्त्रो –य–च्छिथिरा–सप्त च ) (A11)*

**Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-**

(वि वा एतस्या – वायो – इमे वै – चित्तञ्चा – ऽग्निर्भूतानां – देवा वा अभ्याताना – नृताषाड् – राष्ट्रकामाय – देविका – वास्तोष्पते – त्वमग्ने बृह – देकादश )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(वि वा एतस्ये – त्याह – मृत्युर्गन्धर्वो – ऽव रुन्धे मद्ध्यत – स्त्वमग्ने बृहथ् – षट्चत्वारिꣳशत्)

**First and Last Padam of Fourth Prasnam of Kandam 3 :-**

(वि वा एतस्य – प्रियासः )

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां तृतीयकाण्डे चतुर्थः प्रश्नः समाप्तः ॥

------------------------------------

ओं नमः परमात्मने, श्री महागणपतये नमः, श्री गुरुभ्यो नमः

हरिः ओं

## 3.5 तृतीयकाण्डे पञ्चमः प्रश्नः – इष्टिशेषाभिधानं

**TS 3.5.1.1**

पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मद्ध्यतः पौर्णमासी जिगाय ।
तस्यां देवा अधि सँवसन्त उत्तमे नाक इह मादयन्तां ॥
यत्ते देवा अदधु र्भागधेयममावास्ये सँवसन्तो महित्वा ।
सा नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरं ॥
निवेशनी सङ्गमनी वसूनां ँविश्वा रूपाणि वसून्यावेशयन्ती ।
सहस्रपोष॒ं सुभगा रराणा सा न आ गन् वर्चसा – [ ] **1**

**TS 3.5.1.2**

सँविदाना ॥
अग्नीषोमौ प्रथमौ वीर्येण वसून् रुद्रानादित्यानिह जिन्वतं ।
माद्ध्य॒ं हि पौर्णमासं जुषेथां ब्रह्मणा वृद्धौ सुकृतेन
सातावथाऽस्मभ्य॒ं सहवीरा॒ं रयिं नि यच्छतं ॥

आदित्याश्चाऽङ्गिरसश्चाग्नीनाऽदधत ते दर्.शपूर्णमासौ प्रैप्सन्
तेषामङ्गिरसां निरुप्तꣳ हविरासीदथाऽऽ*दित्या एतौ
होमावपश्यन् तावजुहवुस्ततो वै ते दर्.शपूर्णमासौ – [ ] 2

**TS 3.5.1.3**

पूर्व आ ऽलभन्त दर्.शपूर्णमासा–वालभमान एतौ होमौ
पुरस्ताज्जुहुयाथ् साक्षादेव दर्.शपूर्णमासावा लभते ब्रह्मवादिनो
वदन्ति स त्वै दर्.शपूर्णमासावा लभेत य एनयोरनु–लोमञ्च
प्रतिलोमञ्च विद्यादित्यमावास्याया ऊर्द्ध्वं तदनुलोमं पौर्णमास्यै
प्रतीचीनं तत् प्रतिलोमं ँयत् पौर्णमासीं पूर्वामालभेत
प्रतिलोममेनावा लभेतामुमपक्षीयमाण–मन्वप – [ ] 3

**TS 3.5.1.4**

क्षीयेत सारस्वतौ होमौ पुरस्ताज्जुहुयादमावास्या वै
सरस्वत्यनुलोम–मेवैनावा लभते ऽमुमाप्यायमानमन्वा प्यायत
आग्नावैष्णव–मेकादशकपालं पुरस्तान्निर्वपेथ् सरस्वत्यै चरुꣳ
सरस्वते द्वादशकपालं ँयदाग्नेयो भवत्यग्निर्वै यज्ञमुखं
ँयज्ञमुखमेवर्द्धिं पुरस्ताद्–धत्ते यद्–वैष्णवो भवति यज्ञो वै

विष्णुर्यज्ञमेवाऽऽ*रभ्य प्र तनुते सरस्वत्यै ( ) चरुर्भवति सरस्वते

द्वादशकपालोऽमावास्या वै सरस्वती पूर्णमासः सरस्वान् तावेव

साक्षादा रभत ऋद्ध्नोत्याभ्यां द्वादशकपालः सरस्वते भवति

मिथुनत्वाय प्रजात्यै मिथुनौ गावौ दक्षिणा समृद्ध्यै ॥ **4**

*(वर्चसा – वै ते दर्.शपूर्णमासा – वप – तनुते सरस्वत्यै – पञ्चविꣳशतिश्च) (A1)*

**TS 3.5.2.1**

ऋषयो वा इन्द्रं प्रत्यक्षं नापश्यन् तं ँवसिष्ठः प्रत्यक्षमपश्यथ्

सोऽब्रवीद्–ब्राह्मणं ते वक्ष्यामि यथा त्वत्पुरोहिताः प्रजाः

प्रजनिष्यन्तेऽथ मेतरेभ्य ऋषिभ्यो मा प्र वोच इति तस्मा

एतान्थ्स्तोमभागानब्रवीत् ततो वसिष्ठपुरोहिताः प्रजाः प्राजायन्त

तस्माद्–वासिष्ठो ब्रह्मा कार्यः प्रैव जायते रश्मिरसि क्षयाय

त्वा क्षयं जिन्वे – [ ] **5**

**TS 3.5.2.2**

–त्याह दे॒वा वै क्षयो॑ दे॒वेभ्य॑ ए॒व य॒ज्ञं प्रा॑ऽऽ*ह॒ प्रेति॑रसि॒ धर्मा॑य

त्वा॒ धर्मं॑ जि॒न्वेत्या॑ह मनु॒ष्या॑ वै धर्मो॑ मनु॒ष्ये॑भ्य ए॒व य॒ज्ञं

प्रा॑ऽऽ*हान्विति॑रसि दि॒वे त्वा॒ दिवं॑ जि॒न्वेत्या॑है॒भ्य ए॒व लो॒केभ्यो॑ य॒ज्ञं

प्रा॑ऽऽ*हविष्टम्भो॑ऽसि॒ वृष्ट्यै॑ त्वा॒ वृष्टिं॑ जि॒न्वेत्या॑ह॒ वृष्टि॑मे॒वाव – [ ] **6**

**TS 3.5.2.3**

रुन्धे प्र॒वाऽस्य॑नु॒वाऽसीत्या॑ह मिथु॒नत्वा॒योशि॑गसि॒ वसु॑भ्यस्त्वा॒

वसू॑ञ्जि॒न्वेत्या॑हा॒ष्टौ वस॑व॒ एका॑दश रु॒द्रा द्वाद॑शाऽऽ*दि॒त्या ए॒ताव॑न्तो॒

वै दे॒वास्तेभ्य॑ ए॒व य॒ज्ञं प्राऽऽ*हौजो॑ऽसि पि॒तृभ्य॑स्त्वा पि॒तॄन्

जि॒न्वेत्या॑ह दे॒वाने॒व पि॒तॄन॒नु सन्त॑नोति॒ तन्तु॑रसि प्र॒जाभ्य॑स्त्वा

प्र॒जा जि॒न्वे – [ ] **7**

**TS 3.5.2.4**

–त्या॑ह पि॒तॄने॒व प्र॒जा अ॒नु सन्त॑नोति पृतना॒षाड॑सि प॒शुभ्य॑स्त्वा

प॒शूञ्जि॒न्वेत्या॑ह प्र॒जा ए॒व प॒शून॒नु सन्त॑नोति

रे॒व॒दस्योष॑धीभ्य॒स्त्वौष॑धी र्जि॒न्वेत्या॒हौष॑धीष्वे॒व प॒शून् प्रति ष्ठापयत्यभि॒

जिदसि युक्तग्रावेन्द्राय त्वेन्द्रं जिन्वेत्याहाभिजित्या अधिपतिरसि

प्राणाय त्वा प्राणं – [ ] 8

**TS 3.5.2.5**

जिन्वेत्याह प्रजास्वेव प्राणान् दधाति त्रिवृदसि प्रवृदसीत्याह

मिथुनत्वाय स॒ꣳरोहोऽसि नीरोहोऽसीत्याह प्रजात्यै वसुकोऽसि

वेषश्रिरसि वस्यष्टिरसीत्याह प्रतिष्ठित्यै ॥ 9

*(जिन्वेत्य – व – प्रजा जिन्व – प्राणन् – त्रिꣳशच्च)(A2)*

**TS 3.5.3.1**

अग्निना देवेन पृतना जयामि गायत्रेण छन्दसा त्रिवृता स्तोमेन

रथन्तरेण साम्ना वषट्कारेण वज्रेण पूर्वजान् भ्रातृव्यानधरान्

पादयाम्यवैनान् बाधे प्रत्येनान्नुदेऽस्मिन् क्षयेऽस्मिन् भूमिलोके

योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मो विष्णोः क्रमेणाऽत्येनान् क्रामामीन्द्रेण

देवेन पृतना जयामि त्रैष्टुभेन छन्दसा पञ्चदशेन स्तोमेन बृहता

साम्ना वषट्कारेण वज्रेण – [ ] 10

**TS 3.5.3.2**

सहजान्. विश्वेभिर्देवेभिः पृतना जयामि जागतेन छन्दसा सप्तदशेन स्तोमेन वामदेव्येन साम्ना वषट्कारेण वज्रेणा परजानिन्द्रेण सयुजो वयꣳ सासह्याम पृतन्यतः ।

घ्नन्तो वृत्राण्यप्रति ।

यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासं ँयत्ते अग्ने वर्चस्तेनाहं ँवर्चस्वी भूयासं ँयत्ते अग्ने हरस्तेनाहꣳ हरस्वी भूयासं ॥ **11**

*(बृहता साम्ना वषट्कारेण वज्रेण – षट्चत्वारिꣳशच्च) (A3)*

**TS 3.5.4.1**

ये देवा यज्ञहनो यज्ञमुषः पृथिव्यामद्ध्यासते ।

अग्निर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयं ॥

आऽगन्म मित्रावरुणा वरेण्या रात्रीणां भागो युवयोर्यो अस्ति ।

नाकं गृह्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः ॥

ये देवा यज्ञहनो यज्ञमुषोऽन्तरिक्षेऽद्ध्यासते ।

वायुर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयं ॥

यास्ते रात्रीः सवित – [ ] **12**

**TS 3.5.4.2**

-र्देवयानीरन्तरा द्यावापृथिवी वियन्ति ।

गृहैश्च सर्वैः प्रजया न्वग्रे सुवो रुहाणास्तरता रजाꣳसि ॥

ये देवा यज्ञहनो यज्ञमुषो दिव्यद्ध्यासते ।

सूर्यो मा तेभ्यो रक्षतु गच्छेम सुकृतो वयं ॥

येनेन्द्राय समभरः पयाꣳस्युत्तमेन हविषा जातवेदः ।

तेनाऽग्ने त्वमुत वर्द्धयेमꣳ सजातानाꣳ श्रैष्ठ्य आ धेह्येनं ॥

यज्ञहनो वै देवा यज्ञमुषः - [ ] 13

**TS 3.5.4.3**

सन्ति त एषु लोकेष्वासत आददाना विमथ्नाना यो ददाति यो यजते तस्य ।

ये देवा यज्ञहनः पृथिव्यामद्ध्यासते ये अन्तरिक्षे ये दिवीत्याहेमानेव लोकाꣳस्तीर्त्वा सगृहः सपशुः सुवर्गं ँलोकमेत्यप वै सोमेनेजानाद् देवताश्च यज्ञश्च क्रामन्त्याग्नेयं पञ्चकपालमुदवसानीयं निर्वपेदग्निः सर्वा देवताः - [ ] 14

**TS 3.5.4.4**

पाङ्क्तो यज्ञो देवताश्चैव यज्ञञ्चाव रुन्धेगायत्रो वा अग्निर्गायत्र

छन्दास्तं छन्दसा व्यर्द्धयति यत् पञ्चकपालं करोत्यष्टाकपालः

कार्योऽष्टाक्षरा गायत्री गायत्रोऽग्निर्गायत्रछन्दाः स्वेनैवैनं छन्दसा

समर्द्धयति पङ्क्त्यौ याज्यानुवाक्ये भवतः पाङ्क्तो यज्ञस्तेनैव

यज्ञान्नैति ॥ **15**

*(सवित-र्देवा यज्ञमुषः - सर्वा देवता - स्त्रिचत्वारिꣳशच्च) (A4)*

**TS 3.5.5.1**

सूर्यो मा देवो देवेभ्यः पातु वायुरन्तरिक्षाद्-यजमानोऽग्निर्मा

पातु चक्षुषः ।

सक्ष शूष सवितर्विश्वचर्.षण एतेभिः सोम नामभिर्विधेम ते तेभिः

सोम नामभिर्विधेम ते ॥

अहं परस्तादहमवस्तादहं ज्योतिषा वि तमो ववार ।

यदन्तरिक्षं तदु मे पिताऽभूदहꣳ सूर्यमुभयतो ददर्.शाहं

भूयासमुत्तमः समानाना - [ ] **16**

**TS 3.5.5.2**

मा समुद्रादाऽन्तरिक्षात् प्रजापतिरुदधिं च्यावयातीन्द्रः

प्र स्नौतु मरुतो वर्.षयन्तून्नम्भय पृथिवीं भिन्धीदं दिव्यं नभः ।

उद्नो दिव्यस्य नो देहीशानो वि सृजा दृतिं ॥

पशवो वा एते यदादित्य एष रुद्रो यदग्निरोषधीः प्रास्याग्नावादित्यं

जुहोति रुद्रादेव पशूनन्तर्दधात्यथो ओषधीष्वेव पशून् – [ ] 17

**TS 3.5.5.3**

प्रति ष्ठापयति कविर्यज्ञस्य वि तनोति पन्थां नाकस्य पृष्ठे अधि

रोचने दिवः ।

येन हव्यं ँवहसि यासि दूत इतः प्रचेता अमुतः सनीयान् ॥

यास्ते विश्वाः समिधः सन्त्यग्नेयाः पृथिव्यां बर्.हिषि सूर्ये याः ।

तास्ते गच्छन्त्वाहुतिं घृतस्य देवायते यजमानाय शर्म ॥

आशासानः सुवीर्य॑ꣳ रायस्पोष॑ꣳ स्वश्वियं ।

बृहस्पतिना राया स्वगाकृतो मह्यं ँयजमानाय ( ) तिष्ठ ॥ 18

*(समानाना–मोषधीष्वेव पशून् – मह्यं ँयजमाना – यैकञ्च) (A5)*

**TS 3.5.6.1**

सं त्वा नह्यामि पयसा घृतेन सं त्वा नह्याम्यप ओषधीभिः ।

सं त्वा नह्यामि प्रजयाऽहमद्य सा दीक्षिता सनवो वाजमस्मे ॥

प्रैतु ब्रह्मणस्पत्नी वेदिं ँवर्णेन सीदतु ।

अथाहमनुकामिनी स्वे लोके विशा इह ॥

सुप्रजसस्त्वा वय९ँ सुपत्नीरुप सेदिम ।

अग्ने सपत्नदम्भनमदब्धासो अदाभ्यं ॥

इमं ँविष्यामि वरुणस्य पाशं – [ ] **19**

**TS 3.5.6.2**

ँयमबद्ध्नीत सविता सुकेतः ।

धातुश्च योनौ सुकृतस्य लोके स्योनं मे सह पत्या करोमि ॥

प्रेह्युदेह्यृतस्य वामीरन्वग्निस्तेऽग्रं नयत्वदितिर्मद्ध्यं ददता९ँ

रुद्रावसृष्टाऽसि युवा नाम मा मा हि९ँसीर्वसुभ्यो रुद्रेभ्य आदित्येभ्यो

विश्वेभ्यो वो देवेभ्यः पन्नेजनीर्गृह्णामि यज्ञाय वः पन्नेजनीः सादयामि

विश्वस्य ते विश्वावतो वृष्णियावत – [ ] **20**

**TS 3.5.6.3**

स्तवाग्ने वामीरनु संदृशि विश्वा रेताꣳसि धिषीयाऽगन् देवान् यज्ञो नि देवीर्देवेभ्यो यज्ञमशिषन्नस्मिन्थ् सुन्वति यजमान आशिषः स्वाहाकृताः समुद्रेष्ठा गन्धर्वमातिष्ठतानु । वातस्य पत्मन्निड ईडिताः ॥ **21**

*(पाशं – वृँष्णियावत – स्त्रिꣳशच्च) (A6)*

**TS 3.5.7.1**

वषट्कारो वै गायत्रियै शिरोऽछिनत् तस्यै रसः पराऽपतथ् स पृथिवीं प्राविशथ्स खदिरोऽभवद् यस्य खादिरः स्रुवो भवति छन्दसामेव रसेनाव द्यति सरसा अस्याऽऽ*हुतयो भवन्ति तृतीयस्यामितो दिवि सोम आसीत् तं गायत्र्याऽ हरत् तस्य पर्णमच्छिद्यत तत् पर्णोऽभवत् तत् पर्णस्य पर्णत्वं यँस्य पर्णमयी जुहू – [ ] **22**

**TS 3.5.7.2**

–र्भवति सौम्या अस्याऽऽ*हुतयो भवन्ति जुषन्तेऽस्य देवा आहुतीर्देवा वै ब्रह्मन्नवदन्त तत् पर्ण उपाऽ*शृणोथ् सुश्रवा वै नाम यस्य पर्णमयी जुहूर्भवति न पापꣳ श्लोकꣳ शृणोति ब्रह्म वै पर्णो

विण्मरुतोऽन्नं ँविण्मारुतोऽश्वत्थो यस्य पर्णमयी

जुहूर्भवत्याश्वत्थ्युपभृद् ब्रह्मणैवान्नमव रुन्धेऽथो ब्रह्मै - [ ] 23

**TS 3.5.7.3**

-व विश्यद्ध्यूहति राष्ट्रं ँवै पर्णो विडश्वत्थो यत् पर्णमयी

जुहूर्भवत्या-श्वत्थ्युपभृद्-राष्ट्रमेव विश्यद्ध्यूहति प्रजापतिर्वा

अजुहोथ् सा यत्राऽऽ*हुतिः प्रत्यतिष्ठत् ततो विकङ्कत उदतिष्ठत् ततः

प्रजा असृजत यस्य वैकङ्कती ध्रुवा भवति प्रत्येवास्या

ऽऽ*हुतयस्तिष्ठन्त्यथो प्रैव जायत एतद्वै स्रुचा॒ ( ) रूपं ँयस्यैव॒

रूपाः स्रुचो भवन्ति सर्वाण्येवैन॒ रूपाणि पशूनामुपतिष्ठन्ते

नास्याप-रूपमात्मञ्जायते ॥ 24

*(जुहू - रथो ब्रह्म - स्रुचा॒ - सप्तदश च) (A7)*

**TS 3.5.8.1**

उपयामगृहीतोऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामि

दक्षाय दक्षवृधे रातं देवेभ्योऽग्नि जिह्वेभ्यस्त्वर्तायुभ्य

इन्द्रज्येष्ठेभ्यो वरुणराजभ्यो वातापिभ्यः पर्जन्यात्मभ्यो दिवे

त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वाऽपेन्द्र द्विषतो मनोऽप जिज्यासतो

जह्यप यो नोऽरातीयति तं जहि प्राणाय त्वाऽपानाय त्वा व्यानाय त्वा सते त्वाऽसते त्वाऽद्भ्यस्त्वौषधीभ्यो ( ) विश्वेभ्यस्त्वा भूतेभ्यो यतः प्रजा अक्खिद्रा अजायन्त तस्मै त्वा प्रजापतये विभूदाव्.न्ने ज्योतिष्मते ज्योतिष्मन्तं जुहोमि ॥ **25**

*(ओषधीभ्य - श्चतुर्दश च) (A8)*

**TS 3.5.9.1**

यां ँवा अद्ध्वर्युश्च यजमानश्च देवतामन्तरितस्तस्या आ वृश्च्येते प्राजापत्यं दधिग्रहं गृह्णीयात् प्रजापतिः सर्वा देवता देवताभ्य एव नि ह्नुवाते ज्येष्ठो वा एष ग्रहाणां ँयस्यैष गृह्यते ज्यैष्ठ्यमेव गच्छति सर्वासां ँवा एतद् देवताना७ं रूपं ँयदेष ग्रहो यस्यैष गृह्यते सर्वाण्येवैन७ं रूपाणि पशूनामुपतिष्ठन्त उपयामगृहीतो - [ ] **26**

**TS 3.5.9.2**

-ऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामीत्याह ज्योतिरेवैन७ं समानानां करोत्यग्निजिह्वेभ्यस्त्वर्तायुभ्य इत्याहैतावतीर्वै देवतास्ताभ्य एवैन७ं सर्वाभ्यो गृह्णात्यपेन्द्र द्विषतो मन इत्याह भ्रातृव्यापनुत्त्यै प्राणाय त्वाऽपानाय त्वेत्याह प्राणानेव

यजमाने दधाति तस्मै त्वा प्रजापतये विभूदाव्.न्ने ज्योतिष्मते ज्योतिष्मन्तं जुहोमी – [ ] 27

**TS 3.5.9.3**

–त्याह प्रजापतिः सर्वा देवताः सर्वाभ्य एवैनं देवताभ्यो जुहोत्याज्यग्रहं गृह्णीयात् तेजस्कामस्य तेजो वा आज्यं तेजस्व्येव भवति सोमग्रहं गृह्णीयाद्–ब्रह्मवर्चसकामस्य ब्रह्मवर्चसं ँवै सोमो ब्रह्मवर्चस्येव भवति दधिग्रहं गृह्णीयात् पशुकामस्योर्ग्वै दद्ध्यूर्क् पशव ऊर्जैवास्मा ऊर्जं पशूनव रुन्धे ॥ 28

*(उपयामगृहीतो – जुहोमि – त्रिचत्वारि॑ꣳशच्च) (A9)*

**TS 3.5.10.1**

त्वे क्रतुमपि वृञ्जन्ति विश्वे द्विर्यदेते त्रि–र्भवन्त्यूमाः ।
स्वादोः स्वादीयः स्वादुना **सृजा** समत ऊ षु मधु मधुनाऽभि योधि ।
उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिः प्रजापतये त्वा ॥

प्राणग्रहान् गृह्णात्येतावद् वा अस्ति यावदेते ग्रहाः स्तोमाश्छन्दा॑ꣳसि पृष्ठानि दिशो यावदेवास्ति त – [ ] 29

**TS 3.5.10.2**

-दव रुन्धे ज्येष्ठा वा एतान् ब्राह्मणाः पुरा विदामक्रन् तस्मात् तेषाꣳ

सर्वा दिशोऽभिजिता अभूवन्. यस्यैते गृह्यन्ते ज्यैष्ठ्यमेव गच्छत्यभि

दिशो जयति पञ्च गृह्यन्ते पञ्च दिशः सर्वास्वेव दिक्ष्-वृद्ध्नुवन्ति

नवनव गृह्यन्ते नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु दधति

प्रायणीये चोदयनीये च गृह्यन्ते प्राणा वै प्राणग्रहाः - [ ] **30**

**TS 3.5.10.3**

प्राणैरेव प्रयन्ति प्राणैरुद् यन्ति दशमेऽहन् गृह्यन्ते प्राणा वै

प्राणग्रहाः प्राणेभ्यः खलु वा एतत् प्रजा यन्ति यद् वामदेव्यं

ँयोनेश्च्यवते दशमेऽहन् वामदेव्यं ँयोनेश्च्यवते

यद्-दशमेऽहन् गृह्यन्ते प्राणेभ्य एव तत् प्रजा न यन्ति ॥ **31**

*(तत् - प्राणग्रहाः - सप्तविꣳशच्च) (A10)*

**TS 3.5.11.1**

प्र देवम् देव्या धिया भरता जातवेदसं ।

हव्या नो वक्षदानुषक् ॥

अयमु ष्य प्रदेवयुर्.होता यज्ञाय नीयते ।

रथो न योरभीवृतो घृणीवान् चेतति त्मना ॥
अयमग्निरुरुष्यत्यमृतादिव जन्मनः ।
सहसश्चिथ् सहीयान् देवो जीवातवे कृतः ॥
इडायास्त्वा पदे वयं नाभा पृथिव्या अधि ।
जातवेदो नि धीमह्यग्ने हव्याय वोढवे ॥ 32

**TS 3.5.11.2**

अग्ने विश्वेभिः स्वनीक देवैरूर्णावन्तं प्रथमः सीद योनिं ।
कुलायिनं घृतवन्त॑ँ सवित्रे यज्ञं नय यजमानाय साधु ॥
सीद होतः स्व उ लोके चिकित्वान्थ्सादया यज्ञ॑ँ सुकृतस्य योनौ ।
देवावीर्देवान्. हविषा यजास्यग्ने बृहद्-यजमाने वयो धाः ॥
नि होता होतृषदने विदानस्त्वेषो दीदिवा॑ँ असदथ् सुदक्षः ।
अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निः ॥

त्वं दूतस्त्व - [ ] 33

**TS 3.5.11.3**

मु नः परस्पास्त्वं ँवस्य आ वृषभ प्रणेता ।
अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन् दीद्यद् बोधि गोपाः ॥

अभि त्वा देव सवितरीशानं ँवार्याणां ।

सदाऽवन् भागमीमहे ॥

मही द्यौः पृथिवी चन इमं ँयज्ञं मिमिक्षतां ।

पिपृतां नो भरीमभिः ॥

त्वामग्ने पुष्करादद्ध्यथर्वा निरमन्थत ।

मूर्द्ध्नो विश्वस्य वाघतः ॥

तमु – [ ] **34**

**TS 3.5.11.4**

त्वा दद्ध्यङ् ऋषिः पुत्र ईधे अथर्वणः ।

वृत्रहणं पुरन्दरं ॥

तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमं ।

धनञ्जयꣳ रणेरणे ॥

उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाऽजनि ।

धनञ्जयो रणेरणे ॥

आ यꣳ हस्ते न खादिनꣳ शिशुं जातं न बिभ्रति ।

विशामग्निꣳ स्वद्ध्वरं ॥

प्र देवं देववीतये भरता वसुवित्तमं ।

आ स्वे योनौ नि षीदतु ॥

आ – [ ] **35**

**TS 3.5.11.5**

जातं जातवेदसि प्रियꣳ शिशीताऽतिथिं ।

स्योन आ गृहपतिं ॥

अग्निनाऽग्निः समिद्ध्यते कविर्गृहपतिर्युवा ।

हव्यवाड् जुह्वास्यः ॥

त्वꣳ ह्यग्ने अग्निना विप्रो विप्रेण सन्थ् सता ।

सखा सख्या समिद्ध्यसे ॥

तं मर्जयन्त सुक्रतुं पुरोयावानमाजिषु ।

स्वेषु क्षयेषु वाजिनं ॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्न् ।

ते ह नाकं महिमानः सचन्ते यत्र ( ) पूर्वे साद्ध्याः सन्ति देवाः ॥ 36

*(वोढवे– दूतस्त्वं – तमु – सीदत्वा – यत्र – चत्वारि च) (A11)*

==========================

**Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-**

(पूर्ण – र्.षयो – ऽग्निना – ये देवाः – सूर्यो मा – सन्त्वा नह्यामि – वषट्कारः स खदिर – उपयामगृहीतोऽसि – यां वै – त्वे क्रतुं – प्रदेव – मेकादश )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(पूर्णा – सहजान् – तवाऽग्ने – प्राणैरेव – षट्त्रिꣳशत्)

**First and Last Padam of Fifth Prasnam of Kandam 3:-**

(पूर्णा – सन्ति देवाः)

**Kanda Korvai with starting Padams of 5 Prasnams of Kandam 3:**

(प्रजापति – यो वा – अग्ने – वि वै – पूर्णा – पञ्च)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां तृतीयकाण्डे पञ्चमः प्रश्नः समाप्तः ॥

॥ इति तृतीयं काण्डं ॥

## Details of Anuvakam, Panchati and Padam for Kandam 3

| | Anuvakam | Panchati | Padams |
|---|---|---|---|
| Prasna 1 | 11 | 42 | 2248 |
| Prasna 2 | 11 | 46 | 2335 |
| Prasna 3 | 11 | 36 | 1857 |
| Prasna 4 | 11 | 46 | 2392 |
| Prasna 5 | 11 | 36 | 1790 |
| Totals | 55 | 206 | 10622 |